PREFATORY NOTE TO RASIKA-RAMAṆA KĀVYA OF RAGHUNĀTHA (1564 A.D.)

Dr. P. K. Gode of the Bhandarkar Oriental Research Institute, Poona, whose interest and deep study of Indian chronology are so well-known to oriental scholars, handed over to me, some time in 1953, the photo-copy of a rare, perhaps the only autograph copy, from Bodleian Library, Oxford, of *Rasika-Ramaṇa Kāvya* for study and perhaps for preparing an edition of the same. I am now presenting it to scholars through the courtesy of Professor H. D. Velankar and Dr. A. D. Pusalkar of the Bhāratīya Vidyā Bhavan, Bombay. I reproduce below Dr. Gode's note re: his interest in the work:

NOTE

In 1954 I published in the *Annals* of the B.O.R. Institute, Vol. XXXIV, pages 113-127 my paper on the "*Date of Ānandabhāratī or Ānandasiddha and his Medical Treatise Ānandamālā—Between c. A.D. 1350 and 1600.*" This author *Ānandabhāratī* was the pupil of one *Nṛsiṁhabhāratī*. I wanted to identify this guru, if possible, by examining all his namesakes. Among these namesakes of *Nṛsiṁhabhāratī* I found one who was the guru of *Durvāsabhāratī*, the author of a work called *Rasika-Ramaṇa Kāvya* represented by a single MS and described by Aufrecht in his *Catalogue of the Bodleian MSS at Oxford* (1864), pp. 148-150 (MS No. 318). In his *Catalogus Catalogorum,* Part 1, p. 497, Aufrecht describes this poem as "*a poetical biography of the modern Saint Durvāsas* (Padmanābha) by Raghunātha and on page 484 he states: "Raghunātha, son of Jayarāma, wrote in 1564: *Rasika-Ramaṇa Kāvya*". The Colophon of the Oxford MS of this Kāvya reads as follows:—

"संवत् १६२१ वर्षे आश्विनमासे शुक्लपक्षे नवम्यां तिथौ गुरुदिने लिखितमिदं काव्यं **रसिक-रमण**संज्ञं व्यासश्री**जयराम**तनूजेन **रघुनाथेन** भारतीश्री**दुर्वासासंतोषार्थं**"

भारती श्री नृसिंह or नृसिंहभारती is mentioned as the guru of दुर्वासा-भारती in Chap. IV, verse 26. In Chap. VII, verse 3 "गजपतिप्रतापरुद्र" of Orissa is refered to as follows:—

"राजा **गजपती रुद्रप्रतापाख्यो** विराजते ।
यत्र देवी रमा नित्यं रमते स्वविभूतिभिः ॥"

Gajapati Pratāparudra ruled from A.D. 1497 to 1539. If Durvāsas was a contemporary of this king of Orissa, his date would lie between c. A.D. 1490 and 1540 and the date of his guru नृसिंहभारती would lie, say, between A.D. 1450 and 1520. If Raghunātha was both the scribe and author of the रसिकरमणकाव्य (written in A.D. 1564-65) and if he composed this work for pleasing दुर्वासाभारती as stated in the Colophon, we may presume that Raghunātha was possibly a pupil of Durvāsas and further that he wrote this poem in A.D. 1564 when Durvāsas was living in a very advanced age. If these presumptions are correct, the life-time of Durvāsas would lie between c. A.D. 1500 and 1575 and the life-period of his guru Nṛsiṁhabhāratī may be fixed betwen *c.* A.D. 1475 and 1550.

Subsequent to the publication of my paper on the Date of Ānandabhāratī I procured a photo-copy of the *Rare* MS of the *Rasika-ramaṇa Kāvya* through the courtesy of the Bodleian Library, Oxford, and kept it at the disposal of my friend Dr. P. L. Vaidya for purposes of editing. I am very glad to note that Dr. Vaidya has completed the press-copy of this Kāvya and that the *Bhāratīya Vidyā* Bhavan of Bombay has accepted it for publication in their series through the good offices of Prof. H. D. Velankar and Dr. A. D. Pusalkar, the Director and the Asst. Director of the B. V. Bhavan respectively.

P. K. Gode.
24-1-1957.

This Photo MS contains 34 folios of 7″ by 3″ with 10 lines to a page and about 40 letters to a line. It is written very carefully and in good hand, perhaps by the author himself. On it records the title: स्वयं दुर्वासानि काव्य रसिक रमण. The text opens with ओं नमो नारायणाय। श्रीदुर्वासिसे नमः, and ends: .....संवत् १६२१ वर्षे अश्विनमासे शुक्लपक्षे नवम्यां तिथौ गुरुदिने लिखितमिदं काव्यं रसिकरमणसंज्ञं व्यासश्रीजयरामतनूजेन रघुनाथेन भारतीश्री दुर्वासासंतोषणार्थम्. It is followed by the three Praśasti stanzas, viz., शिवमस्तु सर्वजगतः, नमोऽस्त्वनन्ताय सहस्रमूर्तये and यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः etc. as also by दुर्वासाश्रीजयति। श्रीरस्तु। स्वयं दुर्वासानि काव्यं रसिक रमण.

The date of the MS corresponds to Thursday, 15th September, 1564 A.D.

The poem is divided into 18 cantos of varying length. The colophon to each canto records: इतिश्रीमहामतिसुतस्य दुर्वासिसः काव्ये रसिकरमणसंज्ञे कविश्रीरघुनाथविरचिते...., सर्गः In 1.5, the poet states that he composed the poem at the bidding of Durvāsas himself. This Durvāsas, according to the poet, was a pupil of Nṛsinha or Narasiṁha Bhāratī, who was a great saint and possessed divine powers. In his former life he was the son of Atri, i.e.,

Dattātreya, Durvāsas who cursed the Yādavas, and the present saint. The poet tells us that the great qualities of Durvāsas were beyond the reach of ordinary men and even he would not do justice to them. In fact, he undertook the task because Śrīpati, perhaps lord Viṣṇu, asked him in a dream to undertake the poem on Durvāsas. To me it appears, on epigraphical evidence, that the present MS is an autograph copy written by the poet himself, and perhaps no other copy of it was ever made.

The Contents. The poem is divided into 18 cantos. The first canto opens with an invocation to god Ganeśa and Sarasvatī for bestowing upon the poet the requisite inspiration for composing a poem. It is followed by a description of Naimiṣa forest and the city of Kānyakubja (modern Kanauj). The second gives a description of the house of a Brahmin Karuṇākara and his wife Mahāmati. The third gives us an account of the learning and other noble qualities of this couple. Durvāsas alias Padmanābha was the son of this couple. The fourth states festivities on the birth of this son and the training in various śāstras. The fifth canto records a hymn in praise of Nṛsiṁha composed by Durvāsas himself. This Nṛsiṁha is no other than the incarnation of Viṣṇu as also his guru Nṛsiṁha Bhāratī, who made Durvāsas his chief disciple. Thereafter Durvāsas started on pilgrimage, performed a number of miracles. In the course of his pilgrimage, he arrived at Puri, called Puruṣottama Kṣetra. It is here that we get the following stanza:

राजा गजपती रुद्रप्रतापाख्यो विराजते ।
यत्र देवी रमा नित्यं रमते स्वविभूतिभिः ॥

King Gajapati Pratāparudra (1497-1539 A.D.) honoured Durvāsas with costly presents. There is an interesting incident narrated here to glorify the generosity of Durvāsas. A Brahmin named Haradāsa who had a daughter to marry but no funds for the marriage, came to Durvāsas and asked him to help him in the matter. The sage asked him how much the marriage would cost him, and the Brahmin replies:

स्वामिन् सुवर्णलक्षं तु पारिबर्हं विलोक्यते ।
तद्वत्सुवर्णलक्षं तु भोज्याय मुनिपुंगव ॥
सुवर्णलक्षकं तद्वत्कन्याभरणसिद्धये ।
एतावद्यदि द्रव्यं स्यात्तन्मे चिन्ता विनश्यति ॥ VII. 29-30.

On this request, Durvāsas offered him a necklace worth four lacs given to him by King Pratāparudra. The King was very much impressed by the generosity of the sage. The sage told the king that he handed over the necklace to a Brahmin, and other gifts such as chariots etc., which do not suit a sage, he would like to

return to the king keeping to himself only one palanquin. The next few cantos describe the pilgrimage of the sage to various places all over India, and also of some miracles performed by him. At Puri he received the news of the death of his guru Nṛsiṁha Bhāratī at Prayāga. The sage at once decided to go to Prayāga to pay his respects to his guru. He was again asked to go on his pilgrimage. He was well received everywhere. King Śrī Rāma of Mahāpurī called on him and offered him his kingdom as he had no issue. Durvāsas gave him a mantra and a son was born to him. A Brahmin who was suffering from leprosy, was relieved of his disease by the sage by sprinkling water charged with mantra. He explained to his disciples some mystic practices such as षट्चक्रभेद, समाधि, and his own life-story in the previous yugas. In the last canto the poet offers to the sage a hymn of praise.

The poet refers to some contemporary kings, viz., Pratāparudra, Śrī Rāma and Bhīmākṣa, but the two latter cannot be identified. The last named king of Saurāṣṭra helped the sage to establish a math.

The poem is called Rasika-Ramaṇa. But on perusal the reader will not feel the charm of composition. In fact the study of the work does not bear out this claim. It is a poem composed by one who lacked training in grammar, metre and poetics. It contains imitations of phrases from famous classical poets with a number of flaws of grammar, metres etc.

Poona P. L. Vaidya

19-2-57.

रसिकरमणकाव्यम्

१

(1b) ।।ॐ नमो नारायणाय।। श्रीदुर्वाससे नमः।।

श्रीलम्बोदरमेकदन्तममलं तत्त्वार्थसिद्धिप्रदं
कर्पूरादिसुगन्धवस्तुनिचयैरभ्यर्च्य गौरीसुतम्।
उद्गच्छन्मदपानमत्तमधुपोन्नादश्रुतिस्नेहिनं
व्यक्तं वच्मि गुणान्महामतिसुतस्येशस्य दुर्वाससः।।१।।

वक्तुं यस्य गुणान्सहस्रवदनो जिह्वाद्विसाहस्रक-
र्नालं को महिमानमस्य मनुजः स्वल्पाल्पधीर्वर्णयेत्।
किं त्वाकाशमपारमत्र गरुडश्येनादिपक्षीश्वरा
ह्यात्मावस्थितशक्तिसारनिहिता ह्युल्लङ्घयन्ति क्रमात्।।२।।

प्रसन्नताराधिपवक्त्रशोभां
कुन्देन्दुकान्तिं कमलासनस्थाम्।
शुभ्रेण वस्त्रेण विराजमानां
सरस्वतीं नौमि कवित्वहेतोः।।३।।

मूढोऽबुद्धिः कविपदमहं गन्तुकामोऽस्मि मोहात्
उच्चैर्लभ्यं फलमिव तरोर्वामनः प्राप्तुकामः।
किं वास्मिन्मे मतिपरिचितिर्भाविनीशप्रसादा-
त्कर्तव्ये यः परिणतगिरं मूर्खमप्युत्करोति।।४।।

छन्दोलंकारग्रन्थाः क्वचिदपि न मया दृष्टपूर्वाः प्रमादा-
न्नो जाने काव्यबन्धं कविजनहृदयाह्लादिनीं वा गिरं च।
श्रीमद्दुर्वाससाहं निजगुणकथने संनियुक्तः प्रवृत्तो
लोभेनाथापि मोहादिह ह चपलतां मे कवीशाः क्षमध्वम्।।५।।

नत्वा साधुपदारविन्दयुगलं सर्वार्थसिद्धिप्रदं
विष्णुब्रह्ममहेश्वरादिविबुधांश्चाभ्यर्च्य दोषापहान्।
सर्वांश्चापि गुरून्प्रणम्य शिरसा ग्रन्थो मया बध्यते
मूढेनापि मुनीश्वरस्य कृपया दुर्वाससः प्रीतये।।६।।

स्वप्ने यथा श्रीपतिनोपदिष्टा
गुणा मुनीशस्य तपोनिधेस्तु।
दुर्वाससो मह्यमनुक्रमेण
ब्र(2a)वीमि तान्संप्रति बुद्धचेताः।।७।।

अस्ति क्षितौ नमिषकाननाख्यो
देशो दशाशाविदितो गुणाढ्यः ।
सूर्योदये प्रातरिव प्रवृद्ध-
रागः करान्नष्टतमोवितानः ॥८॥

महत्तया यस्य महीविपृष्ठे
देशः समो नाभ्यधिकः कुतः स्यात् ।
विष्णोः सुरौघः प्रबलस्य शश्व-
द्रमालयस्येव सरोजनाभेः ॥९॥

न यत्र दुर्भिक्षभयं जनस्य
श्रुतावपि स्थातुमलं समास ।
क्वचिन्न सीमक्षितिपाः स्वदेश-
सीम व्यतिक्रम्य पदं च चेलुः ॥१०॥

न यत्र प्रत्यर्थिमहीपतेस्तु
स्वप्नान्तरेऽपि प्रतिबाधते स्म ।
लोकं स्वधर्माभिरतं समुद्वे-
गः सर्वगीर्वाणसमृद्धिहृष्टम् ॥११॥

निसर्गवैरा अपि यत्र सत्त्वाः
परस्परं हृष्टतनूरुहास्तु ।
क्रीडन्ति नित्यं परिहृत्य वैरं
गोव्याघ्रसिंहेभमयूरसर्पाः ॥१२॥

वनानि नद्यो गिरयश्च यत्र
सरांसि खेटा न च पत्तनानि ।
रत्नाकराः सन्ति नदाश्च तीर्था-
न्यनेकरूपाणि तमोहराणि ॥१३॥

देशवर्णनकुलकम् ।

देशोऽस्ति तस्मिन्किल कन्यकुब्जा-
भिधं महत्पत्तनमिन्दिरायाः ।
निकेतनं पूर्णसमुल्लसत्स-
त्प्राकाररम्यं शुभगोपुराढ्यम् ॥१४॥

यस्मिन्निभेन्द्रोत्कटकुम्भभूभृद्-
द्रवन्मदासिक्तनरेन्द्रमार्गाः ।
आभान्ति पुष्पोत्करचन्दनो*
रम्याश्चतुर्वर्णसमाकुलाश्च ॥१५॥

यत्र स्फाटिककुड्यमध्यविलसद्विम्बश्रियोद्भासिताः
प्रासादाः शिखराग्रसंस्थकलशोद्दीप्त्या तमोध्वंसकाः ।

शुभ्रक्ष्माधरराजभासमनिशं मुष्णन्ति चोच्छ्रायतोऽ-
ट्टालाग्रध्वजवारितोष्णकिरणप्रोद्दामता (2b) पाः शुभाः ॥१६॥

उन्निद्रपङ्केरुहपत्रनेत्राः
प्रवालरक्तोष्ठपुटाः सुहृष्टाः ।
क्रीडन्ति हर्म्येषु समृद्धिमत्सु
प्रियैः प्रिया यत्र विलासमुग्धाः ॥१७॥

गारुत्मतेन्द्रादिमणिप्रबद्ध-
सोपानपङ्क्तीर्गृहदीर्घिकाश्च ।
नरैर्व्यगाह्यन्त सरोजमध्य-
सक्तैर्भ्रमद्भिर्भ्रमरैश्च यत्र ॥१८॥

गतागते नूपुरराजहंस-
स्वनैर्विकारं मनसि प्रियाणाम् ।
दधत्य उच्चै रमयांबभूवु-
र्विलासहासादिभिरङ्गनास्तु ॥१९॥

अट्टालिकावस्थितकामिकेश-
संस्कारधूपाः प्रययुर्गवाक्षैः ।
सौगन्ध्यतोये नृपवर्यमार्गं
प्रभृत्य सर्वं सुरभीविचक्रुः ॥२०॥

यस्मिन्मृदङ्गध्वनिजातमोहा
घनागमं चेतसि शङ्कमानाः ।
अचीक्लृपन्नर्तितुमाशु दूरा-
द्धर्हाणि सज्जानि मुदा मयूराः ॥२१॥

यस्मिन्महाराजपथे युवान-
स्ताम्बूलपूर्णास्यविचित्रवेषाः ।
परस्परं हासविनोदवार्ताः
कुर्वन्ति वैमानिकचारुशोभाः ॥२२॥

क्वचिज्जगन्मङ्गलनामधेय-
कथां प्रशसन्ति सुहृष्टचित्ताः ।
भालोल्लसत्पुण्ड्रकशंखचक्र-
गदाब्जचिह्नाः पुरुषाश्च यत्र ॥२३॥

प्रवालवैदूर्यमणिप्रणद्ध-
भालाः स्फुरन्ति प्रहृतेन्द्रलक्ष्म्यः ।
मुक्ताफलस्तम्बमयैर्वितानै-
रक्षीणि लोकस्य हरन्ति रम्याः ॥२४॥

रम्भोरू राजमान्याः सकलयुवजनोन्मादनाश्चारुवेषा
रम्यन्ते यत्र नारीः पुरि हृदि विलसच्चारुहाराः सुनाभीः।
यूनां त्रस्यन्मृगाक्षीः कनकरुचितनूः प्रेमदानप्रगल्भाः
पूर्णेन्दुस्पर्धिवक्त्राः स्फुटदश (3a) नरुचिस्फीतहासारुणोष्ठीः॥२५॥

यत्रत्यलोका विबुधेश्वराणां
स्फीतां श्रियं नैव तृणाय चक्रुः।
निरन्तरस्फीतसमृद्धकेता
विहारशय्यासनभोगमत्ताः॥२६॥

प्रतिगृहं सारसहंसचक्र-
मयूरपारावतकूजितानि।
श्रुत्वा मनस्याविरभूदनङ्गः
सज्जीकृतेष्वासधरो जनानाम्॥२७॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञ
कविश्रीरघुनाथविरचिते नेमिषदेशस्थकन्यकुब्जवर्णनो नाम प्रथमः सर्गः

२

उद्यानान्यतिरम्याणि नगरे यत्र भान्ति हि।
वृक्षास्तालतमालेषु यूथिकाजातिचम्पकैः॥१॥

आम्रजंम्बूकदम्बैश्च दाडिमैः श्रीफलैस्तथा।
न्यग्रोधाश्वत्थपनसैः खर्जूरीनीपनिम्बकैः॥२॥

शिग्रुपाटलिधात्राभिः क* णैर्देवदारुभिः।
शमीलोध्रमधूकैश्च बदरीबकुलैस्तथा॥३॥

अशोकप्लक्षजम्बीरैश्चिञ्चिणीचन्दनद्रुमैः।
प्रियङ्गवक्षोडबादामैः पिप्पलीधातकीद्रुमैः॥४॥

राज्ञीभल्लातकारिष्टकोविदारशिरीषकः।
प्रियङ्गुकल्यमरिचपारिजातमहीरुहैः॥५॥

हरीतकीहरिद्रैश्च भूर्जकिंशुककल्पकैः।
केतकीपूगतालैश्च विविधैश्चापि पादपैः॥६॥

वनवर्णनकुलकम्।

येषु पङ्कजकल्हारभूषिताः स्मरदीपिकाः।
सरसीश्चक्रहंसाढ्यैर्विरेजुः पक्षिभूषणैः॥७॥

यास्वङ्गना वारिविहारकाले
केलीः सखीभिर्विदधुः प्रविश्य।
सिञ्चन्त्य अन्योन्य (3b) मयान्तरङ्गः
स्फुटोरुवक्षोजकटीप्रदेशाः॥८॥

यासु क्वचिन्मीनदृशो बकाह्वाः
स्थिरीकृताङ्गा इव धर्मपालाः ।
कुर्युर्झषाणां खलु पद्मशङ्कां
दम्भाधिनाथानिव शिक्षयन्तः ॥९॥

रथाङ्गनाम्नोरपि यत्र केलीः
प्रवृद्धभावप्रसृता बभूवुः ।
भानूदयादस्तमितं च यावत्
कलस्वनैरुद्गतकामयोश्च ॥१०॥

यासां पयोभ्यन्तरगोऽब्जमाला-
स्वन्तर्निपत्य क्षितिजाग्रशाखाः ।
आन्दोलयन्सर्ववनस्थजन्तू-
नाह्लादयामास मुखानिलस्तु ॥११॥

यासूत्कटोद्गारिमदाभिषङ्ग-
मत्तभ्रमद्भृङ्गकुलानुयाताः ।
भूपुष्करैर्वारिगजाः प्रहृष्टा
अपाययन्पार्श्वगताः करेणूः ॥१२॥

यासूद्गतस्वर्णसमानकान्ति-
प्रोद्दामसौगन्ध्यसरोजसक्ताः ।
जगुर्जनं कामशराभिघात-
लक्षं प्रकुर्वन्त इवालिमुग्धाः ॥१३॥

हंसाश्च पद्मोत्करकन्दखण्डा-
न्यत्वा समुन्नद्धमदा विचक्रुः ।
गतिं जगन्मोदकरीमिव स्त्रीः
प्रशिक्षयन्तो वरपक्ष्मदेहाः ॥१४॥

यासूत्कटा वै जलकुक्कुटाश्च
वेगात्समुत्पत्य निपत्य तोये ।
अमज्जतोच्चैःपदपातमस्मि-
ल्लोकेऽरमन्ख्यापयितुं सुहृष्टाः ॥१५॥

पुरविपिनवर्णनकुलकम् ।

तस्मिन्समुद्रप्रथितैकशोभे
वेदत्रयीपारगतस्य नित्यम् ।
द्विजस्य सद्माभवदिन्द्रलोके
सुरेश्वरस्येव विशालबुद्धेः ॥१६॥

आभान्ति यत्राङ्गणभूमयस्तु
सुकाचनद्धा मणिचित्रिताश्च ।

कुर्वन्ति या धीरसमुद्रशङ्का
चलत्पताका * * * नौर्वितानाम् ॥१७॥

गजेन्द्रदद्भिर्घटिताश्च (4a) यत्र
शय्याः पयःफेननिभच्छदास्तु ।
आभान्ति शिल्पोत्तमयत्नसिद्धाः
सुपुत्रिकाहस्तमणिप्रदीपाः ॥१८॥

यस्मिन्गृहान्तर्गतमन्धकारं
मणिप्रदीपाः सहसापहन्ति ।
ध्वजाश्च माणिक्यमयेषु दण्डे-
ष्वितस्ततो वायुवशाच्चलन्ति ॥१९॥

प्रतप्तजाम्बूनददेहकान्त्यो
विकाशपङ्केरुहनेत्रवत्यः ।
क्षौमान्तरोद्भासितरत्नकाञ्च्यो
नानाविहारैर्विहरन्ति दास्यः ॥२०॥

गृहाग्रसंस्थापितहेमकुम्भ-
दीप्त्या सहस्रांशुकराः समेत्य ।
कुर्वन्ति तेजो द्विगुणं स्वकं हि
सङ्गात्सतां स्याद् द्विगुणः प्रभावः ॥२१॥

पठन्ति रामाच्युत कृष्ण विष्णो
लक्ष्मीपते श्रीनृहरे मुरारे ।
शुकाः सुवाचः परिपञ्जरान्तः–
स्थिताः × चेच्छमर्हर्निशं यत् ॥२२॥

दोलाविनोदं पुरुषः श्रितोऽत्र]
स्वर्णासनं स्वर्णगुणं विभाति ।
अट्टालसोपानपरंपराश्च
माणिक्यमय्यः खलु भान्ति यत्र ॥२३॥

दासीसहस्राणि विभान्ति यत्र
सुवर्णनिष्काभरणाभिभाञ्जि ।
पादस्थकूजन्मणिनूपुराणि
पूर्णेन्दुवक्त्राणि मनोरमाणि ॥२४॥

हरिन्मणिप्रौढशिलाप्रबद्धं
यत्प्राङ्गणं पट्टवितानचित्रम् ।
मुक्ताफलगुञ्छनिकायचञ्च-
त्प्रकीर्णपुष्पोत्करमाचकास्ति ॥२५॥

कुड्येषु चित्रेषु च कामिनीनां
बिम्बानि चान्तः परिविस्फुरन्ति ।

मुक्ताफलोद्भासितनासिकानां
कपोलचञ्चन्मणिकुण्डलानाम् ॥ २६ ॥

कस्तूरिकाचन्दनचर्चितेषु
द्वारेषु नानामणिशोभितानि ।
बद्धानि भान्ति स्फुटतोरणानि
जात्यादि (4b) पुष्पोद्ग्रथिताश्च मालाः ॥२७॥
गृहवर्णनकुलकम् ।

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कविश्रीरघुनाथविरचिते करुणाकरगृहवर्णनो नाम द्वितीयः सर्गः ॥

३

तस्मिन्नगारे करुणाकरोऽसौ
विशुद्धचित्तो भगवन्तमाढ्यम् ।
आराधयामास गुणानुवाद-
श्रुतिस्मृतिध्वस्तसमस्तपापः ॥१॥

वृद्ध्या समानो गुरुणा धरित्र्या
तितिक्षयौदार्यगुणेन कर्णः ।
स्वदेहकान्त्या स बभूव भानु-
स्तापपहारी किल चन्द्रवच्च ॥२॥

धैर्येण पृथ्वीधरराजतुल्यो
गाम्भीर्यतो वारिधिवद्बभूव ।
अरातिपक्षोद्धतवारणानां
मृगेन्द्रवत् त्रासकरश्चकासे ॥३॥

वेदान्तसांख्यादिविशुद्धशास्त्र-
तात्पर्यचित्तो धुरि धर्मपानाम् ।
स्थितः श्रुतिप्रोक्तसमस्तकर्म-
मार्गानुयायी समदृक्प्रशान्तः ॥४॥

ऋद्ध्या कुबेरेण समानसारो
भोगे त्रिलोकीपतिवद्बभासे ।
कामाभिवर्षी स्वसमाश्रितानां
कल्पद्रुवत्पण्डितराजमान्यः ॥५॥

भाराभिषाड्वद् द्विसहस्रजिह्व-
त्सर्वस्य पोष्टा किल चन्द्रवच्च ।
समानदर्शी खलु धर्मराजव-
त्स्वप्राणवत्सर्वजनप्रियोऽसौ ॥६॥

पीयूषवर्षी यतवाक् सुदान्तः
स्वाध्यायपाठानुरतोऽनिशं यः ।
सत्याभिभाषी मृदुदृक्करीन्द्र-
समानदेहो नयनाभिरामः ॥७॥
विद्याकुलश्रीतनुगेहजात-
मानानभिस्पृष्टमनाः सदारः ।
नित्यं स्वधर्मानुगतः प्रवृद्ध-
भावेन रत्नं नरदेह(5a)भृ * ॥८॥

करुणाकरगुणवर्णनकुलकम् ।

महामतिस्तस्य बभूव धर्म-
पत्नी पतिप्रेमरता प्रगल्भा ।
मत्तेभकुम्भाभपयोधराभ्या-
मीषन्नमद्देहलता मृगाक्षी ॥९॥
प्रतप्तजाम्बूनददेहकान्तिः
बन्धूकपुष्पारुणपल्लवोष्ठी ।
शिरीषपुष्पच्छविदन्तपङ्क्तिः
कर्णोल्लसत्काञ्चनकुण्डलश्रीः ॥१०॥

कुलकम् ।

याऽरोचतावर्तगभीरनाभिः
पादस्वनन्नूपुरराजहंसी ।
तनूदराभातवलित्रयोर्मि-
गङ्गेव चञ्चद्गतिरार्यवन्द्या ॥११॥
प्रवालशोभाद्भुतपत्रलेखा
प्रसूनमाला पिकनादरम्या ।
जनेप्सितार्थाधिकदानशीला
रराज या कल्पलतेव साक्षात् ॥१२॥
चन्द्रानना मङ्गलभूषणाढ्या
गुरुस्तनी मन्दगतिः शुभाङ्गी ।
अदीव्यत द्यौरिव कौतुकेन
महीतले या रमणीतनूभृत् ॥१३॥
महीव रेजे किल रत्नगर्भा
सरस्वती लोलतरङ्गरम्या ।
पयोधरोद्भासितहृत्सुवर्णा-
चला च सन्मानसलब्धलक्ष्मीः ॥१४॥

महामहि(ति ?)गुणवर्णनम् ।

करुणाकरनामासौ भार्यया सह धर्मवित् ।
तया समर्हयामास नारायणमनामयम् ॥१५॥

क्वचिदयं गलगर्जनतो रमा-
नुदिनलालितपादसरोरुहम् ।
समनुगायति हृष्टतनूरुहो
नयनविच्युतबाष्पजलप्लुतः ॥१६॥

स तया क्वचिदच्युत पद्मजा-
दिसुरसेवित माधव केशव ।
पठति राम जनार्दन वामने-
ति च विशुद्धतनुः करुणाकरः ॥१७॥

जातीकेतकिचम्पकाम्बुजलसत्क (5b) ह्लारकादिप्रसू-
नैरभ्यर्च्य जनार्दनं तुलसिकादामैर्मनोहारिभिः ।
मध्वाक्तैर्घृतपायसश्च विविधरन्नै रमाधीश्वरं
संतोष्य क्वचिदद्भुतं द्विजवरोऽग्रप्रस्थितो नृत्यति ॥१८॥

क्वचित्पुराणोदितविष्णुवार्ताः
शृणोति शुद्धाशयभक्तियुक्तः ।
श्रुत्वा च रोमाञ्चितगात्रयष्टि-
रिवास पीयूषरसाभिषिक्तः ॥१९॥

क्वचिच्च चामीकररत्नदण्डं
चन्द्रांशुगौरं कलहंसशब्दम् ।
स चामरं पाणितले गृहीत्वा
संवीजयामास मुदा मुरारिम् ॥२०॥

श्रुतिपुराणसमीरितसंस्तवै-
रनुदिनं स नवीति रमापतिम् ।
पु ×× कपालि मनोरमदेहभृत्
शुभगिरा चतुरैकशिरोमणिः ॥२१॥

तस्येत्थमाराधयतो नृसिंहं
कालोऽत्यगाद्धाहुलकाभिधानः ।
स्वजाययाहर्निशमर्चितस्य
शचीमहेन्द्रोचितभोगभाजः ॥२२॥

महामतिः साथ दधार गर्भं
पुण्यर्क्षकाले करुणाकरेण ।
समाहितं चाक्षयमर्थमत्र
वेदत्रयीव क्षितिरत्र रत्नम् ॥२३॥

क्रमेण सा दोहददुःखमाप
भावं क्वचिद्वस्तुनि नोपलेभे ।
कषायकट्वम्लरसं विवर्ज्य
भक्ष्यं श्लथद्देहलता मृगाक्षी ॥२४॥

मुखेन सा केतकिपुष्पगौर–
च्छायेन चाल्पाभरणेन तन्वी ।
देहेन काले रजनीव रेजे
तनुप्रकाशेन्दुकलाल्पतारा ॥२५॥

सासूत समय प्राप्ते कुमारं कनकप्रभम् ।
नयनानन्दकर्तारं प्राचीव भगणाधिपम् ॥२६॥

ततो वसन्ते किल फाल्गुनाख्ये
मासे च पक्षे शुभशुक्लसंज्ञे ।
गुर्णैर्दिने नागतिथौ (6a) निशीथे
योगे शिवे रेवतिभे बवाह्वे ॥२६॥
युग्मम् ।

गङ्गान्तरङ्गान्तरसंनिपाती
स्फुटत्सरोजोत्कररेणुमांश्च ।
शाखाः समालिङ्ग्य महीरुहाणां
ववौ तदा वायुरनर्घ्यशीलः ॥२७॥

अधूमकारी श्रुतिसंप्रयुक्तैः
प्रदक्षिणार्चिर्हविरग्निरत्ति ।
मन्त्रैस्तदा निर्वपितं द्विजाग्र्यै–
स्तादृग्जगन्मङ्गलसिद्धयेऽग्निः ॥२८॥

आनन्दसंदोहनिमग्नचित्तः
सुरैर्व्यकीर्यन्त ह पुष्पवृष्टीः ।
तस्मिन्नगारे करुणाकरस्य
दूर्वाक्षताद्यद्भुतवस्तुयुक्ते ॥२९॥

प्रसेदुराशा गगनं बभूव
प्रसन्नताराधिपतारकं च ।
लोकस्य हृष्टानि तदा बभूवु–
र्मनांसि जाते द्विजदेवपुत्रे ॥३०॥

ननृतुर्नाटिचकर्तारो जगुर्मङ्गलगायकाः ।
बन्दिनश्च प्रशंसन्ति जयमङ्गलनिःस्वनैः ॥३१॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे
कविश्रीरघुनाथविरचिते दुर्वाससो जन्ममहोत्सववर्णनो नाम तृतीयः सर्गः॥

४

जातकर्म चकारासौ जाते पुत्रे महामनाः।
करुणाकरसंज्ञस्तु ददौ दानानि पुण्यकृत् ॥१॥

ददौ द्विजवरेभ्यो गा हृष्टोऽसौ करुणाकरः ।
सवत्साः पूर्णभूषाढ्याः सर्वलक्षणसंयुताः ॥२॥

स गुडाज्यं ददौ प्रीतः पुत्रश्रेयोभिकांक्षया।
कामैस्तैस्तैर्ववर्षासौ याचकेभ्यो महामनाः॥ ३॥
ववर्ष कामान्सर्वान्स पर्जन्य इव देहिनाम्।
करुणाकरमिश्रोऽसौ प्रहृष्टः पुत्रजातके॥४॥
जातकर्माख्यसंस्कारे कृते पित्रा तु धीमता।
रराज सुतरां बालो महाम(6b) णिरिव ज्वलन्॥५॥
स पद्मपत्रायतचारुनेत्रः
पद्मान्तरालद्युतिदेहकान्तिः।
सुपद्मरेखाङ्कितपाणिपाद-
स्तं पद्मनाभाख्यमतः पितोचे॥६॥
दिने दिने सोऽथ विवर्धमानः
पुपोष देहं कनकावदातम्।
विलोक्य यं सर्वजनोऽभिमेने
साक्षाद्धरेरंशमिहावतीर्णम्॥७॥
संलाल्यमानः करुणाकरेण
बभौ महाकारुणिकेन बालः।
साक्षाच्छिवेनायतबाहुनेव
कुमारकाख्यो महतां महीयान्॥८॥
पीनायताजानुभुजस्तु कीर-
नासासुनासो विपुलांसधारी।
समुन्नतोदात्तविशालवक्षाः
पूर्णाम्बुदध्वानगभीरनादः॥९॥
अश्वत्थपत्रोदरनिम्ननाभि-
र्वलित्रयख्यापितभूरिभाग्यः।
निगूढजत्रुः पृथुकंधरस्तु
रेखात्रयोद्भासितकम्बुकण्ठः॥१०॥
प्रथमान्तकुलकम्।
रणत्किंकिणीजालकं पादपद्मे
लसत्स्वर्णरत्नाङ्गदं बाहुमूले।
स्फुरन्निष्ककण्ठं चलत्काकपक्षं
जहर्षार्भकं तं विचक्ष्यार्यलोकः॥११॥
मुक्ताफलोरस्थलहाररम्यं
समुल्लसत्कुण्डलकर्णशोभम्।
विशालजङ्घोरुकटिप्रदेशं
प्रवालरक्तोष्ठपुटं गुणाढ्यम्॥१२॥
प्रसन्नताराधिपवक्त्रशोभं
शिरीषपुष्पाञ्चितदन्तपङ्क्तिम्।

कटिप्रबद्धामलहेमसूत्रं
जाम्बूनदोद्दामशिरोविभूषम् ॥१३॥
चलकपोलतलामलकुण्डल–
द्युतिनिरस्ततमोमितजालकम् ।
विपुलभालविराजितकुन्तल–
भ्रमरसेवितवक्त्रसरोरुहम् ॥१४॥
कनकतिलकभालं प्रोल्लसत्पुष्पमालं
कटिहृदयविशालं पाणिपादप्रवालम् ।
पृथुतरगलनालं पु (7a) ण्यवापीमरालं
सकलभुवनपालं सुन्दरं विप्रबालम् ॥१५॥
द्वितीयाकुलकम् ।
अथासौ मातृकाभ्य(स्त)मुखेन प्रविवेश ह ।
ब्रह्मशब्दमयं नद्याद्यभ्यासेनेव सागरम् ॥१६॥
ततार वाङ्मयं ब्रह्म श्रुतिवर्जं स्वबुद्धितः ।
पद्मनाभो गुणैर्बुद्धेर्गुरुवल्लभ आत्मवान् ॥१७॥
अथ यज्ञोपवीताख्यं संस्कारं द्विजसत्तमः ।
चकार पद्मनाभाय तनूजायातिबुद्धये ॥१८॥
दत्ते यज्ञोपवीते तु पद्मनाभो द्विजोत्तमः ।
श्रुतीः पपाठ शुद्धात्मा निस्तन्द्रोऽनुदिनं हि सः ॥१९॥
पालाशदण्डधारी च साक्षसूत्रकमण्डलुः ।
ब्रह्मचारी जितक्रोधो जितासनपरिग्रहः ॥२०॥
जितेन्द्रियो जितात्मा च भिक्षाशी कटिसूत्रधृक् ।
शिखी यज्ञोपवीती च नारायणपरायणः ॥२१॥
शुद्धात्मा समदृग् दान्तः सर्वभूतहिते रतः ।
परापवादविमुखो मौनी च जितनिद्रकः ॥२२॥
मितभुक् मृदुवाक् त्यागी संयमी सत्यसागरः ।
योगी च जितषड्वर्गः संसारविमुखः सदा ॥२३॥
कुलकम् ।
इति श्रुतीरधीयानः पद्मनाभोऽमरप्रभः ।
सर्वत्र जातवैराग्यो ब्रह्मचारी बभूव ह ॥२४॥
अथ गृहमतिहाय शास्त्रदृष्टिः
सदनमिव सागरराजकन्यकायाः ।
भगवति दृढबद्धचित्तवृत्ति–
र्निर्वेदधरः पद्मनाभः प्रवव्राज ॥२५॥
इति शरणमुपजगाम भारतीश्री–
नृसिंहमिति विदितमखण्डयोगसिद्धिम् ।

त्रिभुवनजननयनतोषहेतुं
त्राटकशब्दलिङ्गमनल्पयोगधीः सः ॥२६॥
अनुदिनमेधमानभक्तियोगो
गुरुममितगुणमप्रमेयशक्तियुक्तम् ।
दृढमतिरादरतोर्हं (7b) यांचक्र आरा-
च्चरणनलिनसमुपलालनादिभिः सः ॥२७॥
भारतीश्रीनृसिंहस्तु भक्तिमालोक्य तस्य व ।
परितुष्टो महासिद्धः शिष्यत्वेन तमग्रहीत् ॥२८॥
गुह्याच्छादनमात्रवस्त्रविगतस्नेहं स्वतो निःस्पृहं
तृष्णाक्रोधमनोभवादिसकलद्विट्संघमानापहम् ।
दिव्याशाम्बरधारिणं च तमतो हृष्टस्तु दुर्वाससं
नाम्ना वै कथयांबभूव स गुरुः सच्छिष्यमुद्यद्रुचम् ॥२९॥
स दुर्वासास्तपो युञ्जन् यती योगपरायणः ।
अवात्सीत्संनिधौ योगसंसिद्ध्यभिमतो गुरोः ॥३०॥
वर्षास्वाकाशवासी स बभूव नियतेन्द्रियः ।
निरावरणदेहेन जलासाराभिषाण्मुनिः ॥३१॥
हेमन्तेऽम्बुगगात्रयष्टिरचरद्दिव्यं तपः स्वात्मदृक्
प्राणायामपरायणः स सततं योगीश्वरो मन्त्रवित् ।
शीतोद्भूतदुरन्तदुःखकलने नो दत्तचित्तः क्वचिद्
दुर्वासाः परिगीतलोकसुयशा गीर्वाणसंघस्तुतः ॥३२॥
ग्रीष्मेऽयं च हुताशनान्तरगतो रेजे ज्वलंस्तेजसा
मूर्तोऽग्निः क्षितिदेवसिद्धिनिरतस्तुष्टो हविस्तर्पणैः ।
मानुष्याकृतिमांस्तपोनिधिरिव प्रत्याहृताक्षो मुनि-
र्योगाभ्यासपरायणः स्वनसिदृक् ब्रह्मार्पितान्तर्मनाः ॥३३॥
इत्थं तपस्युग्रतरे रतस्य
संवत्सराः कायदमप्रकर्तुः ।
समाधियोगाभिनिविष्टबुद्धे-
रात्मैकदृष्टेर्बहवः समीयुः ॥३४॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कविश्रीरघुनाथविरचिते दुर्वाससो भारतीनृसिंहशिष्यत्वनिरूपणो नाम चतुर्थः सर्गः ॥

५

[8a] गते बहुतिथे काले दुर्वाससमकल्मषम् ।
कायक्लेशप्रकर्तारं दयया व्याकुलीकृतः ॥१॥
प्रत्यक्षो नृहरिर्भूत्वा प्राह कुन्देन्दुदीधितिः ।
प्रफुल्लवदनाम्भोजः श्रीनिवासः सतां गतिः ॥२॥

युग्मे कुलकम् ।

उत्तिष्ठ तात तपसा परिशुद्धचेताः
सिद्धोऽसि, मे वरय वाञ्छितसिद्धिमत्र ।
तावन्नराः किल भवन्ति न दुःखपात्रं
यावद् भवामि नयनाम्बुरुहाग्रगोऽहम् ॥३॥
इत्थं गिरं श्रीनृहरेर्निशम्य
समाध्यवस्थापितचित्तवृत्तिः ।
शनैः शनैर्लोकमिमं प्रपद्य
दृष्ट्वादिदेवं शिरसा ववन्दे ॥४॥
प्रणम्य देवदेवेशं साष्टाङ्गमखिलार्थदम् ।
अस्तौषीत्पुलकोद्भिन्नप्रेमगद्गदया गिरा ॥५॥
नमो नृसिंहामितविक्रमाय
नमो नमस्तीक्ष्णनखायुधाय ।
नमोऽस्तु दंष्ट्राविकटाननाय
नमो नमस्तेऽस्तु सहस्रकृत्वः ॥६॥
प्रलयपयसि यो वै मत्स्यरूपं विधाय
श्रुतिगणमुपनिन्ये दैत्यमाहत्य शङ्खम् ।
विधिमवनिसुनौकासंस्थितं सत्यसंज्ञं
मनुममितगुणं चातारयद्वारिराशिम् ॥७॥
सुरासुराणामुदधेर्निमन्थे
यो लीलया मन्दरमुद्दधार ।
आस्थाय कूर्माकृतिमादिदेवः
पृष्ठे सुरार्थप्रतिसिद्धये च ॥८॥
वसुंधरामम्भसि संनिमग्नां
स्वदंष्ट्रयोच्चैर्भगवान्बभार ।
वाराहमूर्तिः प्रतियोद्धुमग्रे
निहत्य संग्रामजयेन यो वै ॥९॥
कायाधवं वीक्ष्य च पीड्यमान–
मनेन पित्रा वपुषाविरासीत् ।
योऽन्तः कृपाब्धिः क्रकचाग्रतीक्ष्ण–
नखोग्रसंभावितदेहयष्टिः ॥१०॥
कृत्वा वपुर्वामनं कम्बलेऽर्यो
यज्ञक्षितिं शक्र (8b) यशोऽपहर्तुम् ।
क्रमत्रयोर्वींछलतस्त्रिलोकीं
गतो जहारामरपक्षपाती ॥११॥
यो जामदग्न्याकृतिरर्जुनाख्यं
हत्वा स्फुरद्बाहुकुठारशस्त्रः ।

त्रि(:) सप्तकृत्वोऽवनिमाचकार
निःक्षत्रिणीमुग्रतरस्वभावः ॥१२॥

भूत्वा पुनर्दाशरथिर्जिगाय
रक्षोधिपं योऽद्भुतसेतुकारी।
हेतोर्विदेहाधिपकन्यकायाः
प्रोद्यत्प्रतापाम्बुधिरार्यवन्द्यः ॥१३॥

कृष्णावतारं भुवि यो विधाय
भुवो भरं चापनयद्रमेशः।
कंसादिदुष्टक्षितिपोग्रसैन्यो–
द्भूतं महेन्द्राद्यभिवादितांघ्रिः ॥१४॥

बुद्धस्वरूपं यः कृत्वा मोहयामास दानवान्।
स्वर्गे×न् यज्ञकर्तृंश्च पाषण्डश्रुतिभिः प्रभुः ॥१५॥

कल्किस्वरूपं यः कृत्वा करवालं करेऽकरोत्।
कलेरन्ते कदर्याणां कदनं कृतवान्विभुः ॥१६॥

एवं दशाकृतिकृते नरसिंहाय ते नमः।
केचिदाहुश्चतुर्विंशद्रूपाणि तव च प्रभो ॥१७॥

इत्थं स्तुतो नरहरिः पुनराबभाषे
त्वं तावदत्र भुवनेऽसि ममावतारः।
आत्मानमत्रिभवने किल पूर्वजातं
किं न स्मरस्यभिधया सुमतेऽनयैव ॥१८॥

योऽहं स त्वं च त्वं चाहं न त्वं भेदोऽस्त्यावयोः क्वचित्।
इत्थं सति किमूनं ते यदिच्छंस्तपसि स्थितः १९॥

नृसिंहगदितं श्रुत्वा दुर्वासास्तमभाषत।
स्मराम्येवात्मनात्मानं लोकस्थित्यै तपश्चरे ॥२०॥

इत्युक्तो नरसिंहस्तु मुनिना तेन सत्कृतः।
अन्तर्दधे नरहरिः सुरासुरनमस्कृतः ॥२१॥

अन्तर्हिते नरहरौ दुर्वासाः स तपोनिधिः।
तथैव गुरुसांनिध्ये सोऽकरोद्दुश्चरं तपः ॥२२॥

इति दुर्वाससो वृत्तं श्रुत्वा गुरुरनल्पदृक्।
सर्वेषां स्वात्मशिष्याणां (9a) मुख्यं तमकरोद्विभुः ॥२३॥

इत्थं क्वचिद्योगपरायणस्य
क्वचिच्च शिष्यप्रतिबोधकस्य।
समाः समीयुर्बहवः समीपे
गुरोर्निवासाभिरतस्य तस्य ॥२४॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे
कविश्रीरघुनाथविरचिते दुर्वाससा कृतनृसिंहस्तुतिनिरूपणो नाम पञ्चमः सर्गः॥

६

अथाचकार भगवान्सर्वतीर्थविगाहने ।
संकल्पं मुनिशार्दूलो दुर्वासाः शास्त्रकोविदः ॥१॥
गुरवे स्वात्मसंकल्पं न्यवेदयदगाधधीः ।
आज्ञां चाप्रार्थयत्तं वै प्रणिपातपुरःसरम् ॥२॥
स चाज्ञां प्रार्थयन्तं तं दृष्ट्वा योगेश्वरो गुरुः ।
प्रेमप्रकीर्णहृदयो हर्षाश्रुनयनोऽभवत् ॥३॥
दुर्वाससं समालिङ्ग्य दत्वाशिषमनुत्तमम् ।
स्वकण्ठस्थां स्रजं तस्मै प्रसादीकृत्य दत्तवान् ॥४॥
आज्ञां प्रसन्नहृदयो दुर्वाससमकल्मषम् ।
प्रददौ सर्वतीर्थानामवगाहे महामनाः ॥५॥
गुरोराज्ञामनुप्राप्य दण्डवत्प्रणिपत्य तम् ।
कर्तुं तीर्थानि दुर्वासाश्चेले शिष्यैः समावृतः ॥६॥
गुरोरतिक्रम्य मठं महात्मा
यावद् गतो नन्दनकाननाख्यम् ।
तावज्जगर्जान्तिवनान्तचारी
सिंहो मनुष्याकृतिगन्धहृष्टः ॥७॥
श्रुत्वा केसरिगर्जनं खरतरं शिष्या भयव्याकुलाः
प्रोचुः प्राञ्जलयो गुरो समव नो दुर्वाससं वेपिताः ।
अस्मात्केसरिणः कृतान्तवपुष * त्यत्सरोजाश्रया
तत्रानन्यगति प्रसादसुमुखोऽसि त्वं यथा श्रीपतिः ॥८॥
शिष्येष्वेवं वदत्स्वेव केसरी पुरतोऽभवत् ।
उत्थापितकरः स(9b)र्वे भीताः समभवंस्ततः ॥९॥
भीतांस्तांस्तु समाश्वास्य दुर्वासा इत्यभाषत ।
यष्टिं ददत मे पाणौ हनिष्येऽमुं तयैव हि ॥१०॥
इति दुर्वाससो वाक्यमाकर्ण्य द्रुतमाददुः ।
करे दुर्वाससो यष्टिं तं वारयितुमुद्यताः ॥११॥
तन्निवारणकामोऽसौ दुर्वासा यष्टिमाददे ।
करे यष्टिं समादाय पस्पर्श च मृगाधिपम् ॥१२॥
स स्पृष्टमात्रस्तु मृगेन्द्रदेहं
विसृज्य यष्टया दिवि देवरूपः ।
दुर्वाससं पुष्पचयैर्विकीर्य
स्थितः पराध्यमिलरूपशोभः ॥१३॥
दृष्टं शिष्यैश्चकितचकितं कौतुकाविष्टचित्तैः
पप्रच्छामुं मुनिवरशिरोवन्द्यपादः स इत्थम् ।
कस्त्वं कस्मान्मृगपतितनुः काभिधा ते वदस्व
श्रोतुं वृत्तं तव मम मनस्यस्ति कौतूहलं हि ॥१४॥

इत्थं दुर्वाससा पृष्टः प्राञ्जलिर्नतकंधरः ।
प्रोवाच भवतः किं न विदितं प्रश्नतो ब्रुवे ॥१५॥
गन्धर्वराजतनयो बृहदश्वनामा
ह्याक्षेटकाद्भुतविहारनिविष्टचित्तः ।
शश्वद्धनुःशरनिषङ्गधरो वनस्था-
न्निघ्नंश्चरामि करुणाविमुखोऽहमत्र ॥१६॥
सोऽहं कदाचिदगमं मृगयाहृतान्त-
श्चित्तो विहर्तुमिषुचापधरो मुनीनाम् ।
माद्यन्मृगाकुलमनल्पवनस्थजं तु
प्रौढं तपोवनमथायुरदृष्टतस्तु ॥१७॥
तत्र गत्वा मृगान्बाणैर्मृगयाव्याकुलीकृतः ।
जघान वनजातानि पशूंश्च मृगयुर्यथा ॥१८॥
वार्यमाणोऽपि मुनिभिः कदर्थीकृत्य तानहम् ।
वयस्तेजःश्रियोन्मत्तः पापात्मा विधिनोदितः ॥१९॥
युग्मम् ।
चुक्रुधुर्मुनयो (10a) मह्यं स्ववचोकारिणे तदा ।
क्रोधरक्तेक्षणाः शत्रुं चक्रुर्मां मतिमीश्वराः ॥२०॥
ततः समादाय करे जलं ते
शेपुर्मुनीशा मृगराड् भवेति ।
मां यस्त्वमस्मासु तपःस्थितेषु
मृगान्यहिंसीः खलसिंहवत्त्वम् ॥२१॥
इति मुनिगणशापं कर्णयोः संनिधार्य
करयुगलसरोजं संपुटीकृत्य वेगात् ।
अपगतमदहृत्तत्पादकञ्जं प्रणम्य
विनयमकरमूढं तापसांस्तीक्ष्णवाचः ॥२२॥
इत्यवोचं मुनींस्तांस्तु क्षमध्वं मेऽपराधितम् ।
क्रियतामस्य शापस्यानुग्रहः करुणापरैः ॥२३॥
दासोऽस्म्यहं वो मुनयः कुरुध्वं
दयां मयि प्रीतिसुहृष्टचित्ताः ।
दीनेऽनुकम्प्येव भवादृशानां
कृताञ्जलावत्र दयार्णवानाम् ॥२४॥
इत्थं मयि कृपणवाचि महानुभावाः
कृत्वा कृपामखिलभूतहितस्थचित्ताः ।
मां वाचमूचुरिति—भोः शृणु नो वचांसि
नास्मद्वचस्त्रिभुवनेऽपि मृषा भवेद्धि ॥२५॥
सिंहो भवान्वै भवितैव लोके
तस्माच्छरीरात्तु तदा विमोक्षः ।

अस्मत्कृतानुग्रहतो भविष्य-
त्यनल्पदुःखात्तव देवपुत्र ॥२६॥
चतुर्युगाविःकृतदेहराशि–
र्महामतेरात्मज आत्मवांश्च ।
नृसिंहनाम्नो हि मुनेस्तु शिष्य–
स्तीर्थानि कुर्वन्विचरन्पृथिव्याम् ॥२७॥
नाम्ना प्रोक्तस्तु दुर्वासाः करे कृत्वा तु यष्टिकाम् ।
करिष्यति प्रहारान्ते तदा मुक्तिमवाप्स्यसि ॥२८॥
युग्मम् ।

इत्यनुग्रहमासाद्य मुनीनाममलात्मनाम् ।
देवत्वं तु विहायाहं सिंहो जातो महावने ॥२९॥
सोऽहं त्वया त्रिभुवनार्तिहरेण शापा–
त्संतारितः क्षि (10b) तितलामरवाक्यजातात् ।
पूर्णस्य ते किमपि नास्ति हि वस्तुजात–
मूनं करोमि यदलं तदहं नमामि ॥३०॥
स इत्युक्त्वात्मनो वृत्तं दुर्वाससमकल्मषम् ।
प्रेमप्रगल्भया वाचास्तौषीत्प्रणतकंधरः ॥३१॥
यः सत्याख्ये युगे पूर्वमत्रेर्जातो गृहे मुनिः ।
नाम्नानेनैव विख्यातस्तस्मै दुर्वाससे नमः ॥३२॥
त्रेतायां वर्तमानायां मन्दराख्यमहागिरौ ।
अत्युग्रं यस्तपस्तेपे तस्मै दुर्वाससे नमः ॥३३॥
द्वापरे समनुप्राप्ते सुरलोकमुपागतः ।
यः सुरैः पूजितो भक्त्या तस्मै दुर्वाससे नमः ॥३४॥
युगे कलावथ प्राप्ते महामतिसुतोऽभवत् ।
आत्मज्ञानेन संपूर्णस्तस्मै दुर्वाससे नमः ॥३५॥
भारतीश्रीनृसिंहस्य शिष्यः शमपरायणः ।
अभ्यासयोगयुक्तो यस्तस्मै दुर्वाससे नमः ॥३६॥
आत्मज्ञानावबोधेन तृप्तो भूतदयापरः ।
कामक्रोधादिमुक्तो यस्तस्मै दुर्वाससे नमः ॥३७॥
यः कल्पवृक्षवद् भाति क्षितौ मूर्तो नराकृतिः ।
कामपूरयिता नित्यं तस्मै दुर्वाससे नमः ॥३८॥
यः कृतज्ञः कलावत्र नित्यमाशाप्रपूरकः ।
दयाया वारिधिर्लोके तस्म दुर्वाससे नमः ॥३९॥
यस्य प्रसादान्मुच्यन्ते संकटात्सर्वदेहिनः ।
मद्वत्कृपासमुद्रस्य तस्मै दुर्वाससे नमः ॥४०॥
इमामहरहर्भक्त्या स्तुतिं दुर्वाससः पुमान् ।
यः पठिष्यति कामान्स प्राप्स्यतीह न संशयः ॥४१॥

इत्थं दुर्वाससं स्तुत्वा कृत्वा सप्तप्रदक्षिणम् ।
लब्धानुज्ञो ययौ देवो लोकं स्वं हृष्टमानसः ॥४२॥

इति श्रीमहामतितनयस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कविश्रीरघुनाथवि (11a) रचिते गन्धर्वराजतनयबृहदश्वशापमोक्षो नाम षष्ठः सर्गः ॥

७

गन्धर्वराजतनयं बृहदश्वसंज्ञ–
मुद्धृत्य कौतुकसमाकुलशिष्यवृन्दैः ।
शापाद्ययौ परिवृतः पथि कौतुकानि
क्षेत्रं मुनिर्विरचयन्पुरुषोत्तमाख्यम् ॥१॥
यत्र क्षेत्रे जगन्नाथो देवस्त्रिभुवनेश्वरः ।
स्थितः साक्षात्सतां सिद्धयै सुरासुरनमस्कृतः ॥२॥
राजा गजपती रुद्रप्रतापाख्यो विराजते ।
यत्र देवी रमा नित्यं रमते स्वविभूतिभिः ॥३॥
तत्रागतोऽसौ दुर्वासाः शिष्यसंघसमावृतः ।
रेजे साक्षात्स्वयं रुद्रो जगन्नाथं विलोकयन् ॥४॥
प्रतापरुद्रो नृपतिर्निशम्य
दुर्वाससं स्वं विषयं प्रपन्नम् ।
उपायनानि प्रतिगृह्य हृष्टः
प्रत्युज्जगामात्मनि धन्यताधृक् ॥५॥
तथा हि–वासांसि नवान्यनर्घ्य–
शोभान्यमूल्यानि च रत्नजातीः ।
रथद्विपाश्वान्नरयानपंक्ती–
र्द्रव्यं चतुर्लक्षसुवर्णसंख्यम् ॥६॥
हारं च मुक्तामणिशोभमानं
स्फुरत्प्रभामण्डलदीप्यमानम् ।
कस्तूरिकाचन्दनकेसराणि
ताम्बूलपुष्पाणि लवङ्गधानाः ॥७॥
पूजोपहारं विविधं प्रगृह्य
नृपः पदातिः स्वजनानुयातः ।
स्वजन्म धन्यं बहु मन्यमानः
कृताञ्जलिः पूर्वमुपश्रुतं तम् ॥८॥
गच्छन्मार्गे कुजधनतस्थायसंस्थं (?) मुनीशं
शिष्यैः कैश्चिद्व्यजनकरधृतैः सादरं वीज्यमानम् ।
शिष्यैः कैश्चित्प्रणययुतवचोराशिभिर्हास्यमानं
तेजोदीप्तं प्रकटमिव नृपश्रीदिनेशं व्यचक्षत् ॥९॥

दूराद्दुर्वाससं दृष्ट्वा नृपो गजपतिस्तदा ।
दण्डवन्नमनं कुर्वन्ययौ पार्श्वं महामुनेः ॥१०॥
ददौ संगम्य विधिवत् (11b) धृत्वोपायनमग्रतः ।
मुक्ताहारं समर्प्याथ चतुर्लक्षं सुवर्णकम् ॥११॥
धृत्वा भक्ष्यं च भोज्यं च मुनेरग्रे महामतिः ।
अपूजयन्मुनिं तं स ताम्बूलतिलकादिभिः ॥१२॥
एवं दुर्वाससं पूज्य पश्चात्सर्वान्मुनीन्नृपः ।
पूजयामास विधिवद् हृष्टरोमा महामनाः ॥१३॥
संपूज्य विधिवद् भक्त्या कृताञ्जलिपुटो नृपः ।
गृणन् वाचास्मि धन्योऽहमिति तं संननाम सः ॥१४॥
दुर्वासास्तं समुत्थाप्य दत्वाशिषमनिन्दिताम् ।
पप्रच्छ कुशलं राज्ये राजानं प्रीतिपूर्वकम् ॥१५॥
स पृष्टः कुशलं तेन मुनिना नृपतिर्जगौ ।
अस्त्येव मे शिवं यस्य प्रसादाभिमुखो भवान् ॥१६॥
इत्यन्योन्यं समभवत्प्रीतिस्तापसभूपयोः ।
चक्रतुः सूपविष्टौ तौ कथाश्च विविधाः शुभाः ॥१७॥
दुर्वाससः पुरस्तस्मिन् स्थिते राज्ञि द्विजोऽगमत् ।
चिन्ताव्याकुलचित्तश्चैको ववन्दे स तं मुनिम् ॥१८॥
दृष्ट्वा विप्रं महच्चिन्ताशुष्यद्वदनपङ्कजम् ।
कृपापरिप्लुतः सान्त्वपूर्वं कोमलया गिरा ॥१९॥
कस्त्वं किमर्थमत्राद्य ब्रह्मंस्त्वं समुपागतः ।
चिन्तया व्याकुलोऽसि त्वं कुत इत्यवदन्मुनिः ॥२०॥
युग्मम् ।

इति दुर्वाससा पृष्टः करुणासागरेण सः ।
तमुवाच मुनिं तस्मादर्थसिद्धिं विचिन्तयन् ॥२१॥
इत्थं स पृष्टस्तमभाषतेदं
स्वामिन्द्विजोऽहं हरदासनामा ।
पुत्रीविवाहाकुलचित्तवृत्ति–
र्दरिद्रधामास्मि तपस्विनाथ ॥२२॥
द्रव्यार्जनायाध्वनि तापसेशं
गच्छंस्तु दृष्ट्वाहमुपागतोऽस्मि ।
त्वां वै नमस्कर्तुमनल्पसिद्धिं
चिन्तां मम च्छेत्तुमिहार्हसि त्वम् ॥२३॥
इत्युक्तो मुनिशार्दूलः (12a) प्रहसन्निव तं जगौ ।
अस्माकं न्यासिनां ब्रह्मन् कुतो द्रव्यं यदिच्छसि ॥२४॥
दुर्वाससं पुनः प्राह द्विजोऽसौ स्वार्थसिद्धये ।
मुनेस्तस्य कृपालुत्वं चिन्तयन्मनसि प्रभुम् ॥२५॥

आवृतो भस्मना वह्निः स्वशक्ति किं विमुञ्चति ।
मुनिरूपधरे पद्मनाभौ शक्तिस्तथा स्थिरा ॥२६॥
इत्युक्तो मुनिशार्दूलो दुर्वासाः पुनरब्रवीत् ।
तं द्विजं भो द्विजश्रेष्ठ कियद् द्रव्यं विलोक्यते ॥२७॥
इति पृष्टः स हृष्टात्मा प्राञ्जलिः प्राह तं मुनिम् ।
दुर्वाससं द्विजवरस्तद्दर्शनमहोत्सवः ॥२८॥
स्वामिन् सुवर्णलक्षं तु पारिबर्हं विलोक्यते ।
तद्वत्सुवर्णलक्षं तु भोज्याय मुनिपुंगव ॥२९॥
सुवर्णलक्षकं तद्वत्कन्याभरणसिद्धये ।
एतावद्यदि द्रव्यं स्यात्तन्मे चिन्ता विनश्यति ॥३०॥
मम चिन्ता गतैवाद्य सिद्धस्य तव दर्शनात् ।
उदिते द्युमणौ लोके तमः किं प्रतिबाधते ॥३१॥
इति तस्य वचः श्रुत्वा दुर्वासाः करुणानिधिः ।
औदार्यवारिधिः प्राह द्विजं तं प्रेमपूर्वकम् ॥३२॥
यदि ते स्वर्णलक्षाणां त्रितयं हि विलोक्यते ।
तद्दत्तं भूभुजा स्वर्णचतुर्लक्षं गृहाण मे ॥३३॥
इत्युक्त्वादाद् द्विजेन्द्राय चतुर्लक्षसुवर्णकम् ।
करुणावारिधिर्नित्यं परकष्टविभञ्जनः ॥३४॥
इत्थं द्विजः पूर्णमनोरथोऽसौ
दुर्वाससाकारि मुनीश्वरेण ।
तेन द्विजेनापि च तत्पदाब्जं
प्रणम्य यातं नगरं स्वकं हि ॥३५॥
इति श्रीमहामुनिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कविश्रीरघुनाथविरचिते हरदासद्विजमनोरथपू(12b)रणो नाम सप्तमः सर्गः ॥

८

अथौदार्यं समालक्ष्य श्रीमद्दुर्वाससो नृपः ।
विस्मितः संबभूवासौ तं मेनेंऽशं हरेर्भुवि ॥१॥
एवं द्विजवरस्यार्थं संधाय मुनिपुंगवः ।
राजानं प्रत्युवाचेदं राजन्मे वचनं शृणु ॥२॥
पूजोपहारः सर्वस्तु गृहीतो मे तवानघ ।
रथाश्वनरयानानि शस्तानि नृपतेर्गृहे ॥३॥
तस्माद् गृहाण तत्सर्वं मया प्रत्यर्पितं तव ।
पूजार्थं नृपशार्दूल वयं संन्यासिनो यतः ॥४॥
तथेति वचनं तस्य मुनेः स शिरसा दधौ ।
नृपो गजपतिर्हृष्टः प्रोवाच च मुनीश्वरम् ॥५॥

स्वामिंस्त्वदुक्तं हि मया गृहीतं
तथापि याचे किमपि प्रशस्तम्।
नृयानमेकं मुनिसिंह मे त्व–
मङ्गीकुरु स्नेहतयार्पितं हि ॥६॥
तथेति तद्वचः साधु जगृहे मुनिपुंगवः।
दुर्वासाः प्रीतियुक्तात्मा तुष्टो गजपतेर्यतः ॥७॥
ततोऽनुयातः क्षितिपेन तेन
प्रतापरुद्रेण कृपासमुद्रः।
चेले जगन्नाथमुखारविन्दं
द्रष्टुं स पद्भ्यां विधिपालनाय ॥८॥
गच्छन् पद्भ्यां मुनिवरशिरःसंनतांघ्रिर्मुनीशो
रेजे मार्गे चरणनलिनन्यासतो भूषयन्सः।
पीनोरस्कायतभुजकटिग्रीवया रम्यमूर्ति–
र्लीलागामी मदरसवशात्क्ष्मातले सत्करीव ॥९॥
इत्थं मार्गमतिक्रम्य दुर्वासाः स मुनीश्वरः।
सानुगेन नृपेणानुयातः प्राप जगत्पतिम् ॥१०॥
दुर्वासा दण्डवद् भूमौ जगन्नाथं प्रणम्य सः।
पूजयामास विधिवद्धूपदीपोपहारकैः ॥११॥
पूजयित्वा जगन्नाथं स्तुत्या संतोष्य तं प्रभुम्।
बहिरागत्य राजानं गृहायानुमतिं (13a) ददौ ॥१२॥
सोऽनुज्ञातस्तु राजेन्द्रो नमस्कृत्य मुनीश्वरम्।
महामात्यैर्ययौ सद्म समर्प्य वसु पुष्कलम् ॥१३॥
दुर्वासास्तु ततः शिष्यान्पाकस्थित्यै समादिशत्।
पेचुर्वै विविधान्नानि शाकजातीर्मनोरमाः ॥१४॥
पक्वान्नानि सुहृद्यानि शिष्यास्ते स्म समब्रुवन्।
शिष्यविज्ञापितं श्रुत्वा भोजनायोपचक्रमे ॥ १५॥
स्नात्वाभ्यर्च्य जगन्नाथं दत्वा दानानि बुद्धिमान्।
बुभुजे शिष्यवृन्दैः स महान्नं प्रीतिपूर्वकम् ॥१६॥
भुक्त्वान्नं प्रीतिपूर्वं सः सह शिष्यैर्महामनाः।
चकार शुद्धाचमनं दन्तधावनपूर्वकम् ॥१७॥
कृत्वा च विधिवच्छुद्धाचमनं मुनिपुंगवः।
मुखवासं ततश्चक्रे हस्तवासादिकं च सः ॥१८॥
स भुक्त्वासनमासीनः शिष्यसंघैरुपासितः।
चकार श्रुतिव्याख्यानं शिष्यवृन्दं तु बोधयन् ॥१९॥
इत्थं सुखासनस्थस्य श्रुतिव्याख्यारतस्य च।
तस्य सूर्यो जगामास्तं संध्याकाल उपस्थितः ॥२०॥

संध्याकाले समापन्ने स्नानं कृत्वा महामुनिः ।
सायंसंध्यामुपास्ते स्म श्रुतिधर्मपरायणः ॥२१॥
उपास्य विधिवत्संध्यां जपं कृत्वेष्टदैविकम् ।
सुष्वाप स सुखं शिष्यसंघेन समुपासितः ॥२२॥
ततो रात्र्यां व्यतीतायामुषस्युत्थाय धर्मवित् ।
स्नात्वा शुचिः स दुर्वासा नित्यकर्म चकार ह ॥२३॥
नित्यकर्म निवर्त्याथ जगन्नाथमपूजयत् ।
पूजयित्वा जगन्नाथं बुभुजेऽन्नं चतुर्गुणम् ॥२४॥
तथैव भुक्त्वा च सुखासनस्थ–
श्चकार चर्चाः स्मृतिवेदसिद्धाः ।
प्रबोधयन् शिष्यसमूहमत्र
क्षेत्रे जग(13 b)न्नाथनृपस्य सिद्धः ॥२५॥
दुर्वाससीत्थं जगदेकनाथ–
क्षेत्रे वसत्युत्सुकभूभुजा वै ।
संसेव्यमानेऽर्हणपाणिनासौ
कालोऽत्यगान्मासचतुष्टयाख्यः ॥२६॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कविश्रीरघुनाथविरचिते दुर्वाससो जगन्नाथक्षेत्रनिवासो नाम अष्टमः सर्गः ॥

९

प्रयागवासी नरसिंहनामा
दुर्वाससोऽसौ गुरुरार्यवन्द्यः ।
समाधियोगेन जहौ स्वकं हि
कलेवरं तीर्थवरप्रयागे ॥१॥
क्षेत्रे स्थितः सः पुरुषोत्तमाख्ये
श्रुत्वा तनुत्यागमथो विचित्रम् ।
चक्रेऽन्नभक्ष्ये नियमं महात्मा
गुरोर्मठं चापि चचाल शीघ्रम् ॥२॥
अतिक्रम्य स पन्थानमेकविंशतिभिर्दिनैः ।
प्रयागस्थं गुरुमठमवाप मुनिपुंगवः ॥३॥
गुरोः समाधिस्थानं स दृष्ट्वा प्रेमप्लुताशयः ।
यतिभोज्यस्य संकल्पं दुर्वासाः समचीक्लृपत् ॥४॥
पूजयित्वा गुरोः स्थानं चन्दनैर्धूपदीपकैः ।
दण्डवत्प्रणिपाताद्यैर्यतिभोज्यं चकार सः ॥५॥
पायसैः शर्करायुक्तैर्घृतौघेन परिप्लुतैः ।
मोदकैश्चैव पूपाभिः शाकैश्च विविधैः पृथक् ॥६॥

आढक्योदनसंयुक्तर्दधिमिश्रैः प्रतापवान् ।
यतीन्संभोजयामास गुरुप्रीणनहेतवे ॥७॥
ताम्बूलपुष्पैः संपूज्य यतीन्सर्वानिशेषतः ।
ब्राह्मणेभ्यो महात्मासौ ददौ दानानि मन्त्रवित् ॥८॥
गुरोः समाधिस्थलसेवयेत्थं
दुर्वाससोऽगुः कतिचि(14 a)त्तु मासाः ।
तीर्थान्यिटस्वेति ततो बभूव
दुर्वाससं गीर्नभसः प्रगल्भा ॥९॥
श्रुत्वा वाचं गगनजनितां शुद्धभावः प्रसन्नो
दुर्वासाः श्रीगुरुपदलसत्पङ्कजं चिन्तयित्वा ।
कृत्वा भोज्यं व्रतविधिलसद्देहशोभाधराणां
कर्तुं तीर्थान्यकृत नियमं पात्रमेकं गुणानाम् ॥१०॥
नमस्कृत्य गुरोः स्थानं कर्तुं तीर्थानि मन्त्रवित् ।
शिष्यसंघपरीतस्तु तस्मात्स्थानाच्चचाल सः ॥११॥
स गतः प्रथमं कामरूपाख्यं देशमुत्तमम् ।
तद्देशस्थानि तीर्थानि चकार मुनिनायकः ॥१२॥
कुर्वंस्तद्देशतीर्थानि दुर्वासाः शिष्यसंवृतः ।
नगरं मल्लपुर्याह्वं ययौ यादृच्छिको मुनिः ॥१३॥
ब्रह्मपुत्रो ह्लदो नाम्ना तीर्थं परमपावनम् ।
चकास्ति स्वच्छपाथोभिः पूर्णो यत्र तमोपहः ॥१४॥
यत्र नीलस्तु नाम्ना वै पर्वतः शोभते सदा ।
नानाद्रुमलताकीर्णो निर्झरैरुपशोभितः ॥१५॥
यस्मिंस्तु नगरे रम्ये तद्देशाधिपतिर्महान् ।
श्रीरामाख्यो नृपो नित्यं वसति श्रीपतिप्रियः ॥१६॥
तस्मिन्मल्लपुरे शिष्यैः परीतो मुनिनायकः ।
स्नात्वा ब्रह्मह्लदे तीर्थे तत्कण्ठे समुपाविशत् ॥१७॥
तीर्थोपकण्ठे स्थित एव तस्मिन्
मुकुन्दमिश्रो द्विजपुंगवस्तु ।
स्नातुं समभ्यागत एनमत्र
दुर्वाससं वै स्थितमैक्षतासौ ॥१८॥
दुर्वा(स)सं स्थितं वीक्ष्य शिष्यसंघोपसेवितम् ।
कृताञ्जलिपुटो भूत्वा प्रणनाम स दण्डवत् ॥१९॥
कस्त्वं दुर्वाससेत्युक्तो द्विजन्मात्मानमादरात् ।
कथयामा(14a)स मुनये इदं च तमयाचत ॥२०॥
स्वामिन्मदीयं भवनं त्वमद्य
पवित्रयस्वागमनेन नाथ ।

जातं मदीयं सफलं हि जन्म
त्वद्दर्शनात्पावय मे कुटुम्बम् ॥२१॥
इति विज्ञप्तिमाकर्ण्य दुर्वासास्तु द्विजन्मनः ।
तथेति जगृहे तस्य वचनं तापसेश्वरः ॥२२॥
स तद्दर्शितमार्गेण तस्य सद्माप तापसः ।
कौतुकाविष्टचेतोभिर्मनुष्यैः पथि वीक्षितः ॥२३॥
मुकुन्दमिश्रोऽपि च सद्म नीत्वा
दुर्वाससं स्वं विविधोपहारैः ।
पाद्यार्घधूपादिभिरर्चयत्तं
शिष्यांस्तथा भोजनतर्पणैश्च ॥२४॥
दुर्वाससं तोषयित्वा शिष्यसंघसमावृतम् ।
ताम्बूलतिलकश्चैव पुष्पैरभ्यर्चयत्तु सः ॥२५॥
प्रत्यहं तेन विप्रेण पूजितस्तद्गृहेऽवसत् ।
इत्थं स मुनिशार्दूलो दुर्वासाः करुणालयः ॥२६॥
दुर्वाससि स्थिते तत्र लोका अर्हणपाणयः ।
आजग्मुस्तं नमस्कर्तुं यथा श्रीपतिमादरात् ॥२७॥
मुकुन्दमिश्रस्य तु सद्ममार्गो
बभूव लोकस्य गतागतैस्तु ।
आबालवृद्धस्य समाकुलोऽलं
तं वै नमस्कर्तुमुपेयुषश्च ॥२८॥
ताम्बूलपुष्पैर्मुनिनायकं तं
दुर्वाससं सर्वजनोऽभिपूज्य ।
न प्राप तृप्तिं परिपश्यमानो
दुर्वाससो वक्त्रसरोजशोभाम् ॥२९॥
दुर्वाससं विलोक्यैव प्रहृष्यन्तः परस्परम् ।
मिलित्वा तस्य माहात्म्यं प्रोचुः कारुण्यवारिधेः ॥३०॥
राजा श्रीरामनामासौ दुर्वाससमकल्मषम् ।
नगरं स्वं समापन्नं श्रुत्वानन्दप्लुतोऽभवत् ॥३१॥
धन्यं स्वजन्म मन्वानः प्रोत्साहेण (?) समन्वि(15a)तः ।
उपायनानि संगृह्य तं नमस्कर्तुमाययौ ॥३२॥
कोटीद्वयसुवर्णस्य निर्मितं पादुकाद्वयम् ।
तद्वद् द्वादशकोटयाह्वस्वर्णमूल्यं दुकूलकम् ॥३३॥
हारं च सुमहत्तारमुक्ताफलविराजितम् ।
मणिहस्त्यश्वद्रव्याणि शोभनानि बहूनि च ॥३४॥
स्वर्णाष्टादशकोटीभिर्निर्मितां सुमहामनाः ।
शय्यां तस्मै समर्प्याथ दण्डवत्तं ननाम सः ॥३५॥

संपूज्य विधिवद्राजा श्रीरामाख्यस्तु तापसम् ।
दुर्वाससं ततः शिष्यान्पूजयामास सादरम् ॥३६॥

पूजयित्वा सशिष्यं तं श्रीरामो नृपतिस्ततः ।
कृताञ्जलिपुटो भूत्वा समुवाच तपोनिधिम् ॥३७॥

अद्य मे सफलं जन्म जीवितं मम सार्थकम् ।
धन्योऽस्म्यनुगृहीतोऽस्मि त्वया कारुण्यवारिधे ॥३८॥

कृताञ्जलिपुटो भूत्वा त्वामहं प्रार्थयामि भो (:) ।
इदं समृद्धं राज्यं मे गृहाण तपसां निधे ॥३९॥

नो चेत्पुत्रं गुणनिधिं देहि कृत्वा दयां मुने ।
किं राज्येन मम स्वामिन्विना पुत्रं समृद्धिमत् ॥४०॥

त्वद्दर्शनात्पूर्णमनोरथाः स्यु–
जीवाः किमत्र प्रतिभाति चित्रम् ।
कल्यन्तदं प्राप्य पुनः प्रभूत–
शोकाय किं भो(:) प्रभवन्ति दीनाः ॥४१॥

मां तारयाप्तं तव पादपद्म–
नावं सुचिन्ताब्धिमनन्तपारम् ।
त्वं तापसैर्वन्दितपादपद्मः
सिद्धोऽसि, सिद्धिं मम देहि नाथ ॥४२॥

पूर्वजैः सह गच्छन्तं तमोन्धं करुणानिधे ।
त्वमर्हसि समुद्धर्तुं मुने संततिदानतः ॥४३॥

इति राज्ञोऽतिकरुणं निशम्य वचनं मुनिः ।
प्रहस्य प्राह राजेन्द्र वचो (15b)मेऽवहितः शृणु ॥४४॥

सस्त्रीकस्तु मया दत्तं मन्त्रं यदि भवान्भवेत् ।
धर्तुं क्षमस्तदा पुत्रप्राप्तिस्तव भविष्यति ॥४५॥

इति दुर्वाससो वाक्यमाकर्ण्य नृपतिस्ततः ।
कृताञ्जलिपुटो भूत्वा तथेति प्रत्यपद्यत ॥४६॥

तथेत्यङ्गीकृते राज्ञा दुर्वासास्तमभाषत ।
प्रातर्दास्यामि ते मन्त्रमद्य याहि स्वकं गृहम् ॥४७॥

दुर्वाससेत्यनुज्ञातः श्रीरामो नृपतिस्तदा ।
दण्डवत्तं नमस्कृत्य ययौ सुहृदनुव्रतः ॥४८॥

गते राज्ञि स दुर्वासाः शिष्यसंघैरुपासितः ।
सायंसंध्यामुपास्याथ तल्पे राज्ञार्पितेऽस्वपत् ॥४९॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कविश्रीरघुनाथविरचिते दुर्वाससः कामरूपदेशागमनो नाम नवमः सर्गः ॥

१०

अथ रात्र्यां व्यतीतायां प्रभाते समुपागते।
उत्थाय नृपतिः प्रातः स्नानं चक्रे सजायया ॥१॥
वाससी परिधायाथ शुद्धे तौ दम्पती क्षणात्।
पूजोपहारं गृह्यामुं दुर्वाससमुपागतौ ॥२॥
प्रातःस्नानं तु कृत्वा स यावदर्चयति प्रभुम्।
नृसिंहं तावदागत्य राजा द्वारि व्यतिष्ठत ॥३॥
उपागतं तं नृपतिं मुनीन्द्रं
मुकुन्दमिश्रो द्विजपुंगवः सः।
दुर्वाससं विज्ञपयांचकार
कृताञ्जलिर्नम्रशिरोधरस्तु ॥४॥
श्रुत्वा विप्रमुखात्तं वै राजानं समुपागतम्।
दुर्वासास्तं द्विजं प्रोचे राजानं संप्रवेशय ॥५॥
इति दुर्वाससाज्ञप्तः स द्विजस्तं नरोत्तमम्।
श्रीरामं संनिधौ भार्यायुतं दुर्वाससोऽनयत् ॥६॥
स राजा मुनिशार्दूलं नमस्कृत्य तदाज्ञया।
(16a) कृताञ्जलिपुटो भूत्वा संनिधौ समुपाविशत् ॥७॥
दुर्वासा नृहरेः पूजां समाप्य स हि मन्त्रवित्।
मन्त्रं राज्ञे सभार्याय ददौ सिद्धिप्रदायिनम् ॥८॥
दुर्वाससोऽसौ नृपतिर्बभूव
शिष्य सभार्यः शुभरामनामा।
ददौ स्वदेशस्य दशांशभागं
ग्रामस्य लक्षं गुरुदक्षिणार्थे ॥९॥
अनन्तं चैव द्रव्यं स गुरवे नृपति (र्) ददौ।
दुर्वाससे मुनीशाय करुणासागराय च ॥१०॥
राज्ञी दुर्वाससो मन्त्रप्रभावेन बभूव सा।
गर्भिणी, नितरां राजा दुर्वाससमपूजयत् ॥११॥
प्रत्यहं तं नमस्कर्तुमागच्छति नृपोत्तमः।
नानोपायनपाणिः स श्रीरामो नृपसत्तमः ॥१२॥
द्विजन्मनो मुकुन्दस्य जन्मन्येवं (सद्मन्येवं?) सतः प्रभोः।
राज्ञा संपूज्यमानस्य दिनानि कतिचिद्ययुः ॥१३॥
एकदा तं मुनिवरं सुखासीनं तपोनिधिम्।
कुष्ठेन प्रक्षरद्देहः कश्चिद्विप्रो ननाम ह ॥१४॥
स नत्वा विधिवत्सिद्धं दुर्वाससमघापहम्।
स विज्ञप्तिं चकारामुं स्वामयक्षपणाय व ॥१५॥
दुर्वासास्तं द्विजं दीनमामयव्याकुलीकृतम्।
कृपासंपूर्णहृदयो दृष्ट्वासीत्करुणानिधिः ॥१६॥

दृष्ट्वा विप्रं महारोगग्रस्तं स मुनिनायकः ।
वारिणा मन्त्रपूतेनाभ्यषिञ्चत्तं तपोनिधिः ॥१७॥

स स्पृष्टमात्रो जलबिन्दुनैव
दुर्वाससा मन्त्रयुतेन कुष्ठी ।
द्विजोऽभवत्तत्क्षणमेव तेन
रोगेण मुक्तः करुणाम्बुराशेः ॥१८॥

रोगेण मुक्तः स बभूव हृष्टो
दुर्वाससं भक्तियुतो ननाम ।
द्विजोऽगमच्चात्मनिकेतनं सः
सुखानि गत्वानुदिनं स्म भुङ्क्ते ॥१९॥

दुर्वा(16b)सा मुनिशार्दूलो मोचयित्वा द्विजोत्तमम् ।
रोगात्कुष्ठात् महत्तीव्रादवात्सीत्तत्र पूजितः ॥२०॥

गते बहुतिथे काले दुर्वासा मतिमादधे ।
कर्तुं तीर्थानि चान्यानि देशान्तरगतानि सः ॥२१॥

मुकुन्दमिश्रं मुनिनायकोऽसौ
संतोष्य वित्तेन मुनिः कृतज्ञः।
श्रीरामसंज्ञं नृपतिं बभाषे
मुकुन्दमिश्रं सुखिनं चिकीर्षुः ॥२२॥

मुकुन्दमिश्राय मया प्रदत्ता
ग्रामा मदीयाः प्रतिपालनीयाः ।
त्वया नृपेन्द्रास्य समर्पयालं
तुष्टेन नित्यं हि मुकुन्दनाम्नः ॥२३॥

अहं प्रयास्ये किल तीर्थयात्रा–
सिद्ध्यै सदा त्वं नृहरिं भजस्व ।
स्वधर्मसंस्थः प्रतिपालयंश्च
प्रजा यतीगोद्विजमानदाता ॥२४॥

इत्थं दुर्वाससं तीर्थयात्रायां तु समुत्सुकम् ।
अद्य श्वो वा गन्तुकामं नृपो दृष्ट्वा स विह्वलः ॥२५॥

मुकुन्दमिश्रोऽपि बभूव बाष्प–
कलाकुलाक्षो मुनिनायकं तम् ।
समुत्सुकं गन्तुमनल्पसिद्धिं
कृतोपकारं मुनिना स्मरन्सः ॥२६॥

सान्त्वयित्वा स राजानं द्विजं चापि महामनाः ।
पुनरात्मागमनया कथयेत्थमचीक्लृपत् ॥२७॥

दत्वा द्विजेभ्यो निजवस्तुजातं
कर्तुं स तीर्थानि चचाल सिद्धः ।

स्वशिष्यसंघेन समावृतश्च
शरीरसंस्थोदनवस्त्रशेषः ॥२८॥
इत्थं दुर्वाससे राजा तीर्थयात्रोत्सुकाय सः ।
नरयानं दिव्यरत्नभूषितं प्रददौ तदा ॥२९॥
राज्ञा दत्तं नृयानं सः प्रगृह्य मुनिपुंगवः ।
द्विजायादान्मुकुन्दाय सपर्याबहुकारिणे ॥३०॥
ततो राज्ञा च विप्रेण मुकुन्देन महामुनिः ।
अनुयातो नागरिकैः साश्रु (17a) कण्ठैश्चचाल सः ॥३१॥
दूरदेशागतांस्तांस्तु राजादीन्मुनिपुंगवः ।
संनिवर्त्यातिकृच्छ्रेण तीर्थयात्रां चचाल सः ॥३२॥
इत्थं मुनीशेन मुकुन्दमिश्रो
दुर्वाससाकारि कृपालुनासौ ।
तीर्थानि कर्तुं चलितेन पूर्ण-
मनोरथोऽसावपि मेऽस्तु तुष्टः ॥३३॥
इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे
कविश्रीरघुनाथविरचिते मुकुन्दमिश्रदरिद्रनिर्यापणो नाम दशमः सर्गः ॥

११

अथ प्रवक्ष्यामि मुनीश्वरस्य
दुर्वाससोऽहं किल तीर्थयात्राम् ।
यां भक्तिभावेन पुमांस्तु श्रुत्वा
मुच्येत पापान्महतोऽप्यदूरात् ॥१॥
स शुभमल्लपुराच्चलितो मुनि-
र्भ्रमरकुण्डमियाय तपोनिधिः ।
परशुरामसुरोपितमस्ति य-
त्तुलसिवृन्दमनल्पफलप्रदम् ॥२॥
नीलाभिधानक्षितिभृद्विपृष्ठे
विराजते सर्वतमोपहारि ।
ख्यातं जगत्यर्थचतुष्टयस्य
स्नानैकमात्रात्प्रदमाशु यत्तत् ॥३॥
युग्मेऽन्वयः ।
तत्र स्नात्वा मुनिवरः कामाक्षां समपूजयत् ।
देवीं सर्वेष्टदां नत्वा शिष्यसंघैरुपासितः ॥४॥
ततो रूपेश्वरं देवं दुर्वासाः संननाम ह ।
ततः स च ययावूनकोटिलिङ्गं महामुनिः ॥५॥
तानि नत्वा स तु करमुक्तेश्वरमपूजयत् ।
दुर्वासास्तापसश्रेष्ठः शिष्यसंघैरुपासितः ॥६॥

ततः स फलयाख्ये तु गिरौ तिष्ठन्तमादरात् ।
यशोमाधवमानम्य ब्रह्मसागरमाययौ ॥७॥
स ब्रह्मसागरे स्नात्वा गङ्गासागरसंगमम् ।
ययौ स्नातुं मुनिवरो दुर्वासाः स तपोनिधिः ॥८॥
तत्र स्नात्वा मुनिवरो माधवं (17b) देवमादरात् ।
पूजयामास विधिवद् दुर्वासास्तापसेश्वरः ॥९॥
माधवं देवमभ्यर्च्य कुण्डारकमथागमत् ।
तत्र स्नात्वा स तु महानदीसंगममागमत् ॥१०॥
महानदीसागरसंगमे स
स्नात्वा जगन्नाथमनन्तमाद्यम् ।
ययौ नमस्कर्तुमघापहं वै
क्षेत्रे स्थितं वै पुरुषोत्तमाख्यम् ॥११॥
जगन्नाथं नमस्कृत्य कूर्मदेवं ननाम सः ।
कूर्मं नमस्कृत्य जयनृसिंहं समपूजयत् ॥१२॥
ततो मुनी राजमहेन्द्रतीर्थं
ययौ महाकारुणिको मुनीन्द्रः ।
स्नात्वा तु तत्र त्रिजगत्प्रसिद्धं
गोदावरीसंगममाजगाम ॥१३॥
तत्र स्नात्वा मुनिवरो विद्यानगरमागमत् ।
तुङ्गभद्रा नदी यत्र विरूपाक्षः शिवः स्थितः ॥१४॥
तुङ्गभद्रामहातीर्थे स स्नात्वा मुनिपुंगवः ।
अपूजयद्विरूपाक्षं शिवं सर्वार्थसिद्धिदम् ॥१५॥
विरूपाक्षं नमस्कृत्य तृणामल्लं ननाम सः ।
तृणामल्लं नमस्कृत्य श्वेताम्बरमपूजयत् ॥१६॥
श्वेताम्बरं नमस्कृत्य दुर्वासास्तापसेश्वरः ।
गोसमाधिं जगामाथ शिष्यसंघसमावृतः ॥१७॥
गोसमाधेर्मुनिवरः कामेरीमाजगाम ह ।
स कामेर्या मुनिवरः कुम्भकर्णं जगाम सः ॥१८॥
कुम्भकर्णात्तु दुर्वासास्तेजाउरमुपाययौ ।
तेजाउरान्मुनिवरः शिष्यैः परिवृतोऽचलत् ॥ १९॥
ततो जगाम दुर्वासाः सेतुबन्धं महामुनिः ।
तत्र स्नात्वा महातीर्थे रामेश्वरमपूजयत् ॥२०॥
ततः स च मुनिर्मानमथुरामाजगाम ह ।
त्रिपथां मथुरां गत्वा मुखनाथमपूजयत् ॥२१॥
मथुरामाजगामाथ दुर्वासा (18a) स्तापसेश्वरः ।
रङ्गनाथं ततोऽगच्छद् दुर्वासाः स तपोनिधिः ॥२२॥

ततश्च स मुनिश्चन्द्रकुमारशिखरं ययौ।
ततो हरिहरं देवं दुर्वासाः संननाम ह ॥२३॥
उज्ज्वलं नरसिंहं स दुर्वासास्तत आगमत्।
मल्लिकार्जुनशृङ्गं च ततोऽसावाजगाम ह ॥२४॥
त्रिमल्लं त्रिपतीं चैव दुर्वासा आजगाम ह।
ततः स शिवकान्तीं च जगाम मुनिसत्तमः ॥२५॥
विष्णुकान्तीं ततोऽगच्छद् दुर्वासास्तापसेश्वरः।
पक्षितीर्थं जगामाथ ततः स मुनिनायकः ॥२६॥
वेदार्णं च ततोऽगच्छद् दुर्वासाः स तपोनिधिः।
ततश्च मुनिशार्दूलः करस्वामिनमाययौ ॥२७॥
ततस्त्रिनगरीतीर्थं जगाम स तपोनिधिः।
लम्बिकाकोकिलां चैव ववन्दे तापसेश्वरः ॥२८॥
ततः कन्याकुमारीं स ववन्दे मुनिसत्तमः।
आदिकेशवमभ्यर्च्य पद्मनाभं ननाम ह ॥२९॥
पद्मनाभं नमस्कृत्य जनार्दनमपूजयत्।
ततः स च तृणावल्लीतीर्थमाप महामुनिः ॥३०॥
ततो जगाम दुर्वासास्तीर्थं पापविनाशनम्।
तत्र स्नात्वा मुनिवरः सोऽतितीर्थं जगाम ह ॥३१॥
ततः स तिलगञ्जीति तीर्थं परमपावनम्।
ततः केवलपुत्रेति तीर्थं प्राप महामुनिः ॥३२॥
ततश्च स मुनिश्चौरभवानीमाजगाम ह।
ततोऽसौ मुनिशार्दूलः कज्जलीतीर्थमाग(म)त्॥३३॥
ततोऽसौ मुनिशार्दूलः शृङ्गेरीमठमाययौ।
तुङ्गभद्रानदीतीर्थमाजगाम महामनाः ॥३४॥
शंकरनारायणमथ पूजयामास तत्त्ववित्।
ततः स वत्सरणुकं (18b) तीर्थमायात्तपोनिधिः ॥३५॥
कोटिलिङ्गमथोऽगच्छच्छिष्यसंघसमावृतः।
ततोऽसौ मुनिशार्दूलो भट्कलामाजगाम ह ॥३६॥
ततः स शिष्यैरनुयातमार्गो
गोकर्णलिङ्गं समुपाजगाम।
स चन्द्रभूतीगिरिमाजगाम
पश्चात्तपोधाम मुनीश्वरश्च ॥३७॥
ततोऽसौ मुनिशार्दूलो ब्रह्मपर्वतमाययौ।
नासिकत्र्यम्बकं चैव छत्रसिंहमथागमत् ॥३८॥
सर्वज्ञयोगिनीं पश्चाद् दुर्वासाः संननाम ह।
ततः स मुनिशार्दूल ऊनाईतीर्थमाग(म)त् ॥३९॥

तत्र स्नात्वा मुनिवरः कर्दमेश्वरमाययौ ।
तं पूजयित्वा विधिवत्तपतीसंगमं ययौ ॥४०॥
तपतीसंगमे स्नात्वा रेवासंगममागमत् ।
दुर्वासा मुनिशार्दूलः शिष्यसंघसमावृतः ॥४१॥
स रेवासंगमे स्नात्वा महीसंगममाययौ ।
स च साभ्रमतीसंगं जगाम मुनिनायकः ॥४२॥
ततोऽसौ मुनिशार्दूलः श्वेतपर्वतमाययौ ।
ततो गुप्तप्रयागं स जगाम मुनिनायकः ॥४३॥
गुप्तप्रयागाच्च मुनिर्मूलद्वारवतीमगात् ।
ततोऽसौ माधवप्राचीं जगाम मुनिनायकः ॥४४॥
प्रभासं स मुनिः प्राप्य यत्र प्राची सरस्वती ।
तत्र स्नात्वा मुनिस्तीर्थे माधवं समपूजयत् ॥४५॥
टटरीसूर्यमभ्यर्च्य (१) मूलमाधवमाययौ ।
स दुर्वासा मुनिवरः शिष्यैः समभिपूजितः ॥४६॥
ततः स रैवताख्यं तु गिरिं प्राप मुनीश्वरः ।
स्नात्वा च स मृगीकुण्डे दामोदरमपूजयत् ॥४७॥
ततः स सरवं नाम्ना पर्व (19a) तं संननाम ह ।
ततो बिलेश्वरं पूज्य लघुद्वारवतीमगात् ॥४८॥
लघुद्वारवतीस्थानाद् द्वारकामाजगाम सः ।
दुर्वासास्तापसश्रेष्ठः शिष्यसंघसमावृतः ॥४९॥
चक्रतीर्थं महत्पुण्यं नदी यत्र च गोमती ।
देवस्त्रिविक्रमो विष्णुः सर्वतीर्थमयी च या ॥५०॥
युग्मम् ।

त्रिविक्रमं नमस्कृत्य कृतकृत्योऽभवन्मुनिः ।
कल्याणं च नमस्कृत्य हृष्टरोमा बभूव सः ॥५१॥
तं पूजयित्वाद्भुतवस्तुजातः
स धर्मशालां मुनिरास्थितोऽलम् ।
रेजे स्वशिष्यः परितः स्थितैस्तु
संसेव्यमानस्त्रिदशैरिवेन्द्रः ॥५२॥
तावद् दुर्वाससं श्रुत्वा भीमाक्षः क्षत्रियोत्तमः ।
समागतं प्रहृष्टात्मा तं नमस्कर्तुमाययौ ॥५३॥
उपायनानि प्रतिगृह्य हृष्टो
भीमः पदातिर्नृपतिर्मुनीशम् ।
न्यस्याग्रतः पूजनवस्तुजातं
दुर्वाससं दण्डवदाननाम ॥५४॥

तं पूजयित्वा मुनिसिद्धसंघ–
संसेवितं शिष्यगणोपयुक्तम् ।
कृताञ्जलिः क्षत्रियसंघसेव्यो
व्यतिष्ठताग्रे खलु दासवत्स ॥५५॥
कृताञ्जलिपुटो भूत्वा दुर्वाससमभाषत ।
स्वामिन्निदं समृद्धं मे राज्यं तुभ्यं निवेदितम् ॥५६॥
भीमस्य तद्वचः श्रुत्वा प्रहस्य मुनिरब्रवीत् ।
वयं राज्येन किं कुर्मो यतयो विगतस्पृहाः ॥५७॥
तथाप्यहं तवेच्छायाः पूर्त्यै भूमिं तु तावतीम् ।
गृ (ग्र) हीष्याम्येव यावत्या मठो मे जायते शुभः ॥५८॥
ततस्तथेति भीमेन गृहीतवचने मुनिः ।
वन्द्यमानो लोकसंघैर्मठार्थं भूमिमाददौ ॥५९॥
तेन भूमौ गृहीतायां भीमोऽसौ क्षत्रियोत्तमः ।
मठं संकारयामास दुर्वासोर्थे महामनाः ॥६०॥
कारयित्वा स (19b) रमणं मठं दुर्वाससे ददौ ।
संपूर्णं भक्ष्यभोज्यैस्तु शिष्यसंघयुताय च ॥६१।
मठे तस्मिन्स दुर्वासा राज्ञा संमानितोऽवसत् ।
दिनानि कतिचिद् हृष्टः शिष्यसंघसमावृतः ॥६२॥
स द्वारकायां स्वमठं विधाय
स्वतीर्थयात्राप्रतिसिद्धये च ।
चचाल शिष्यैरुपशोभमानो
राजानमात्मागमनं तमुक्त्वा ॥६३॥
मुक्त्वा द्वारवतीं सिद्धः शंखोद्धारमथागमत् ।
तत्र शंखिनमानर्च नारायणमनामयम् ॥६४॥
ततः पिण्डारकं नाम तीर्थं परमपावनम् ।
दुर्वासाः स जगामाथ शिष्यसंघैरुपासितः ॥६५॥
ततोऽम्बराख्यां नगरीं प्रयागं
आशापुरीमभ्युपसाद्य पश्चात् ।
सिन्धोः समुद्रस्य च संगमं स
मुनिर्ययौ तापससंघवन्द्यः ॥६६॥
तत्र स्नात्वा मुनिवरो हिङ्गुलाजामपूजयत् ।
तां पूजयित्वा दुर्वासा धारातीर्थं जगाम सः ॥६७॥
तत्र स्नात्वा मुनिवरः कटाक्षं क्षेत्रमागमत् ।
ततष्टिल्लां नमस्कृत्य गोरक्ष्याट्टं समाययौ ॥६८॥
काश्मीरदेशं समुपागतोऽसौ
देवीं ववन्दे किल सा (शा) रदां च ।

तां पूजयित्वा विधिवन्मुनीशः
पूजोपहारैः स ततश्चचाल ॥६९॥

मणिमहेशमियाय ततो मुनि–
स्त्रिदशवन्दितपादसरोरुहम् ।
तमभिवन्द्य ततो मुनिरागम–
न्नगरकोटिकृतावसतिं शिवाम् ॥७०॥

तां पूजयित्वा विधिवन्मुनीशः
पृथूदकं सम्यगियाय हृष्टः ।
स्नात्वा च तत्रापि मुनीश्वरोऽसौ
सरस्वतीं वै स नदीं जगाम ॥७१॥

स्नात्वा च तत्रापि मुनिर्वसिष्ठ-
प्राचीमुपेयाय सुहृष्टचित्तः ।
ततः कुरुक्षेत्रमुपाजगाम
महा(20a)मुनिः शिष्यसमावृतोऽसौ ॥७२॥

ततो हरिद्वारमुपाजगाम
मुनिर्हृषीकेशमियाय पश्चात् ।
तं पूजयित्वा विधिवन्मुनीशो
देवप्रयागं समुपाजगाम ॥७३॥

ततः स सप्तधाराख्यं तीर्थं परमपावनम् ।
जगाम मुनिशार्दूलो यत्र गङ्गास सप्तधा ॥७४॥

स्नात्वा च तत्रापि मुनीश्वरोऽसौ
केदारशंभुं समुपाजगाम ।
तं चापि नत्वा विधिवन्मुनीशो
रुद्रप्रयागं समुपाजगाम ॥७५॥

पश्चाच्च शिष्यैः परिशोभमानो
नन्दप्रयागं समुपाजगाम ।
कर्णप्रयागं स मुनिश्च पश्चा–
ज्जगाम सिद्धेश्वरवन्द्यपादः ॥७६॥

मुनिर्बदर्याश्रममाप पश्चा-
न्नारायणो यत्र नरश्च नित्यम् ।
स्थितस्तपस्युग्रतरे हिताय
लोकस्य सर्वार्थद आश्रमाद्यः ॥७७॥

ततश्च मुनिशार्दूलः स ययौ हस्तिनापुरम् ।
दुर्गमुक्तेशमानम्य शुक्लक्षेत्रमुपाययौ ॥७८॥

ततो मुनिर्नैमिषकाननं च
ययौ मुनिर्मिश्रिषमेव पश्चात् ।
ययावयोध्यां स मुनिश्च पश्चा–
त्स शिष्यवृन्दैः परिशोभमानः ॥७९॥
सरय्वाख्या नदी यत्र तीर्थं परमपावनम् ।
दुर्वासा मुनिशार्दूलः शिष्यसंघसमावृतः ॥८०॥

युग्मम् ।

स्नात्वा च तत्रापि मुनिः सदूलू–
वैश्वानरं सम्यगियाय हृष्टः ।
ततः सरो मानससंज्ञमाप
मुनीश्वरोऽसौ सह शिष्यवृन्दैः ॥८१॥
ततो हरिक्षेत्रमुपाजगाम
स मुक्तिक्षेत्रं च मुनिस्ततोऽगात् ।
स गल्लकीं चापि नदीं जगाम
मुनिः स्वशिष्यैः परिशोभमानः ॥८२॥
स नीलकण्ठं च ततो जगाम
स छाछिकामाप मुनिश्च पश्चात् ।
स कौशिकीं चापि नदीं जगाम
शिष्यैः परीतः खलु सिद्धवन्द्यः ॥८३॥
वाराहदेवं विविधोपचारैः
संपूजयित्वा मुनिसिद्धवन्द्यः ।
पश्चान्मुनिः स कनकायिसंज्ञां
नदीमवापातुलसिद्धलक्ष्मीः ॥८४॥
महालक्ष्मीमुपेयाय दुर्वासास्तापसेश्वरः ।
ततस्तां विधिवत्पूज्य शिष्यवृन्दयुतोऽचलत् ॥८५॥
पश्चान्मुनिर्भ्रमरकुण्डमुपाजगाम
त्रैलोक्यविश्रुतमघापहमाशु पुंसाम् ।
आरभ्य (20b) यत्प्रवसितः स मुनी(नि)स्तु तीर्थ–
यात्रोत्सवाय च तदेतदवाप हृष्टः ॥८६॥
दुर्वाससेत्थं तु मुनीश्वरेण
चतुर्दिगन्तान्तगतान्यकारि ।
तीर्थानि शिष्यैरुपशोभितेन
कारुण्यवारांणि(नि)धिनात्मयोगात् ॥८७॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कविश्रीरघुनाथविरचिते दुर्वाससश्चतुर्दिक्तीर्थयात्रावर्णनो नामैकादशः सर्गः ॥

१२

अथ प्रवक्ष्यामि मुनेस्तु तस्य
मध्यस्थतीर्थक्रमणं तपोऽब्धेः ।
कृपासमुद्रस्य च यत्पुमांस्तु
श्रुत्वा महापातकतोऽपि मुच्येत् ।।१।।
चचाल तस्माद् भ्रमराख्यकुण्डात्
स ब्रह्मपुत्रं ह्रदमाजगाम ।
स्नात्वा च तत्राखिलसिद्धवन्द्य–
स्त्रिभुक्तिराजं मुनिराजगाम ।।२।।
तं पूजयित्वा विधिवन्मुनीशः
स वाग्मतीमाप नदीं महात्मा ।
स्नात्वा च तत्राखिलशिष्यवृन्दै–
स्तस्माच्च तीर्थात्स मुनिश्चचाल ।।३।।
ददरिसंगमम (वा)प ततो मुनि –
र्निखिलशिष्यगणैरुपशोभितः ।
द्युनदिसंगममा(वा)प ततो ह्यसौ
मुनिशिरोनतपादयुगस्ततः ।।४।।
स वैद्यनाथं च मुनिस्ततोऽगा–
त्तं चापि नत्वा स गयां ययौ च ।
स्नात्वा च तत्रापि मुनीश्वरोऽसौ
काशीं पुरीं सम्यगियाय हृष्टः ।।५।।
गङ्गाजले तत्र मुनिः स्वशिष्यैः
स्नात्वा समं हृष्टतरो महात्मा ।
श्रीविश्वनाथं विविधोपचारैः
संपूजयामास स धूपदीपैः ।।६।।
स पूजयित्वा विधिवन्मुनीशः
श्रीविश्वनाथं गिरिजाधिनाथम् ।
सद्यः स्वबुद्धया रचितेन चन्द्र–
चूडाष्टकेनाथ नुनाव हृष्टः ।।७।।
श्रीमन्नगेन्द्रतनयाहृदयंगमं तं
ब्रह्मादिभिः समुपलालितपादपद्मम् ।
श्रीविश्वनाथममलं शिरसा नमामि
सर्वार्थसिद्धिदमहं सततं शिवाख्यम् ।।८।।
नयनत्रितयचञ्चच्चारुवक्त्राम्बुजश्रीः
प्रमुदितसुरसंघैः सादरं वीज्यमानः ।
रचितविविधभूषो हेमसिंहासनस्थः
क्रमुनकसितदेहः (?) चद्रन्चूडः सहायः ।।९।।

कनकरुचिरकान्त्यालंकृतां (21*a*) कौमदीप्र (?)
नृपतितनययेपद्मासर्स मुक्तमास्यम् (?)
विलसदधरकान्तं धम्यंत्पासुनेत्रं (?)
परशुडमरुहस्तैश्चन्द्रचूडः सहायः ॥१०॥

गगनततपतद्भागीरथीनिर्झराम्भः–
पुलकरुचिरदेहो चारुचिन्तामणिर्माम् ।
दशनरुचिकलापस्फीतगल्लस्थ
.............................॥११॥

सुरवरमुकुटाग्रस्फीतमाणिक्यदीप्ति–
ज्वलदमलप्रदीप ×× नीराज्यमानः ।
विकचवनरुहश्रीहृन्मुखाम्भोरुहो मे
फणिपतिकृतहारश्चन्द्रचूडः सहायः ॥१२॥

वलयकृतफणीन्द्रो नाशिताशेषतन्द्रः
सुरनिकरमहेन्द्रोदन्त ×× श्च मन्द्रः ।
गरलमपि सुवीर्यं कण्ठदेशे दधानः
सुरवरकृतनन्दश्चन्द्रचूडः सहायः ॥१३॥

कनककपिशकेशो वन्दितांघ्रिर्महेशो
सुभगनयनदेशो यक्षरक्षःसुरेशः ।
जनितरुचिरहासो निर्जिताशेषकाशो
मम भवतु सुकेशश्चन्द्रचूडः सुमुख्याः . . . ॥१४॥

सुभगनयनकान्त्या नन्दितानेकभृत्यः
विगलदमृतवाग्भिर्भक्तकामान्दधानः ।
स्फटिकविशददेहो भस्मलिप्ताङ्गयष्टिः
नयनकुमुदचन्द्रश्चन्द्र. . . . . ॥१५॥

इदं चन्द्रचूडाष्टकं ये पठन्ति
त्रिकालं समाधाय चित्तं महेशे ।
धनं धान्यमैश्वर्यमत्रोपभुक्त्वा
लभन्ते त ईशेन सायुज्यमन्ते ॥१६॥

वाराणसीनाथमसौ मुनीशः
स्तुत्वानमद्दण्डवदेनमित्थम् ।
क्षितौ ततः शिष्यसमूहयुक्तः
तीर्थाटनायापि मुनिः प्रतस्थे ॥१७॥

विहाय काशीं स पुरीं महात्मा
प्रयागमागान्मुनिसिद्धबन्धः ।
तीर्थाधिनाथं त्रिनदीसमाजो
यत्रास्ति लोकप्रथितः सशिष्यः ॥१८॥

स्नात्वा मुनिस्तत्र सशिष्यकोऽसौ
श्रीमाधवं देवमपूजयद्वै ।
तं पूजयित्वा विधिवन्मुनीशः
शिष्यैः परीतो मथुरां जगाम ॥१९॥

कृष्णं समभ्यर्च्य मुदान्वितोऽसौ
कृताश्रमं तत्र सदैव हृष्टः ।
कालंजरं पर्वतमाजगाम
ततो मुनिः शिष्यसमूहयुक्तः ॥२०॥

स नीलकण्ठं विधिवच्च नत्वा
मुनिर्गिरिसधवलं (?) जगाम ।
यतो नदी सर्वतमोपहाभू–
द्रेवा त्रिलोकीजनवन्द्यतोया ॥२१॥

ततो जटाशंकरमा(21b)जगाम
देवं त्रिलोकीजनवन्द्यपादम् ।
शिष्यैः परीतो मुनिसंघवन्द्य–
स्तं चापि नत्वा स मुनिश्चचाल ॥२२॥

ततो मुनिर्माहुरदत्तसंज्ञं
स्थानं ययौ शिष्यसमावृतोऽसौ ।
स्थानाच्च तस्मात्कुलजां भवानीं
पश्चान्नमस्कर्तुमुपाजगाम ॥२३॥

स तां नमस्कृत्य शिवां महात्मा
मुनिस्ततस्तोरणमालमैक्षत् ।
दृष्ट्वा मुनिस्तोरणमालमारा–
दवन्तिकामाप मुनिश्च पश्चात् ॥२४॥

शिवं महाकालमपूजयत्सः
शिष्यैरुपेतो मुनिसंघवन्द्य : ।
तत्र स्थितं लोकहिताय सिद्ध-
स्तं पूजयित्वा च ततश्चचाल ॥२५॥

अथैकलिङ्गं समुपाजगाम
शिष्यैः परीतः स मुनिर्महात्मा ।
तत्पूजयित्वा विधिवन्मुनीशः
स पुष्करं तीर्थमुपाजगाम ॥२७॥

स्नात्वा च तत्रापि मुनिर्महात्मा
ययौ गिरीशं स च सारणेशम् ।
सिद्धो नमस्कर्तुमनल्पसिद्धि–
स्तं पूजयित्वा च ततश्चचाल ॥२८॥

ततो मुनिः सिद्धगणाधिनाथो–
ऽर्बुदाचलं शिष्यगणेन युक्तः ।
ययौ नमस्कर्तुमनल्पसिद्धिं
सिद्धोऽचलाख्यं शिवमत्रसंस्थम् ॥२९॥
ततोऽचलेशं विधिवत्प्रणम्य
स शिष्यवृन्दैर्मुनिरम्बिकां च ।
ययौ नमस्कर्तुमथापि तां सः
संपूजयामास बहूपचारैः ॥३०॥
तां पूजयित्वा विधिवन्मुनीशः
क्षेत्रं ययौ सिद्धसमाख्यमारात् ।
सरस्वतीबिन्दुसरोवरेषु
स्नात्वाभवत्पूर्णमनोरथोऽसौ ॥३१॥
स लोहयष्टीं समुपाजगाम
ततो मुनिः शिष्यगणाभियातः ।
स्नात्वा च तत्रापि मुनीश्वरोऽसौ
पुरीं पुनर्द्वारवतीमवाप ॥३२॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कविश्रीरघुनाथविरचिते दुर्वाससो मध्यदेशस्थती र्थयात्रावर्णनो नाम द्वादश सर्गः ॥

१३

(22a) अथागतो द्वारवतीं पुरीं च
चतुष्पथे सर्वनमस्कृतोऽसौ ।
संशोभमानं स्वमठं विवेश
शिष्यैः परीतः खलु सिद्धवन्द्यः ॥१॥
तत्र प्रविश्याखिलसिद्धवन्द्यः
स्नानादि सर्वं विधिवच्च कृत्वा ।
त्रिविक्रमं देवमपि प्रणम्य
शिष्यैः परीतो बुभुजे मुनिः सः ॥२॥
भुक्त्वा स्वशिष्यैरुपशोभमानो–
ऽन्नानि स्वरुच्याभिमतानि सिद्धः ।
यावत्स शुद्धाचमनं चकार
तावत्तु सिद्धैः कृतमासनं सत् ॥३॥
भुक्त्वोपक्लृप्तेऽद्भुत आसनेऽसौ
स्थितश्चकासे किल शिष्यवृन्दैः ।
संसेव्यमानो विबुधैर्यथेन्द्रः
कैश्चित्स्तुवद्भिः स्तुतिभिः सुहृष्टैः ॥४॥

लसत्पट्टकूलादिभिः शोभमानं
स्वशिष्यैः समन्ताच्च संसेव्यमानम् ।
समीयुर्नमस्कर्तुमेनं हि लोकाः
पुरीद्वारकावासिनस्त्यक्तशोकाः ॥५॥

प्रतिदिनमकलङ्कं द्वारकावासिनस्ते
तमुपययुरधीशं बालवृद्धाः प्रहृष्टाः ।
नमितुमखिलयतीन्द्रैर्वन्दितांघ्रि मुनीशं
कनकमणिसुमुक्तोपायनानि प्रगृह्य ॥६॥

संपूज्यमाने मुनिसिद्धवन्द्ये
दुर्वाससीत्थं नृपतिस्तदानीम् ।
तं प्रत्यहं नागरिकैः प्रहृष्टैः
सिद्धेश्वरं हृष्टतरोऽशृणोद्वै ॥७॥

उपायनानि प्रतिगृह्य हृष्टः
श्रुत्वा नृपोऽगान्मठमस्य विप्रैः ।
साकं नमस्कर्तुमनल्पसिद्धिं
दुर्वाससं शिष्यगणैरुपेतम् ॥८॥

नृपो मठद्वारि व्यतिष्ठतामुं
सिद्धेश्वरं नमितुं महात्मा ।
आगत्य तद्दर्शनमत्र नाप
(22b) पुनः सुपुण्येन जनेन दृश्यम् ॥९॥

तत्र स्थितस्यैव नृपस्य तस्य
सूर्योऽस्तमागान्नृपतिस्ततोऽसौ ।
ययावमात्यैर्बहुभिः परीतो
गृहं स्वकं स्वाघमनुस्मरन्वै ॥१०॥

रात्रौ गतायां नृपतिः प्रभाते
कृत्वाह्निकं कर्म मुनीश्वरस्य ।
पुनर्मठद्वारमुपाजगाम
दुर्वाससो दर्शनमाप नैव ॥११॥

इत्थं मुनीशं नृपतेस्तु तस्य
द्रष्टुं प्रयत्नं मुनिसिद्धवन्द्यम् ।
प्रकुर्वतोऽगुस्त्रिगुणानि सप्त
दिनान्यमात्यादिगणैर्युतस्य ॥१२॥

द्वाविंशकेऽसौ नृपतिर्मठस्य
द्रष्टुं स्थितो द्वारि जनानुयातः ।
मुनरहोरात्रममुं महात्मा
दुर्वाससं सिद्धगणानुयातम् ॥१३॥

प्रातः समुत्थाय मुनिस्तु यावत्
त्रिविक्रमं संनमितुं स याति ।
तावन्मठद्वारि नृपः स्थितोऽसौ
दुर्वाससो दर्शनमाप भाग्यात् ॥१४॥

दुर्वाससं तं नृपतिः स दृष्ट्वा
हर्षाश्रुनेत्रो मुनिमाननाम ।
स्तुवन्स्वभाग्यं स्वजनानुयातः
सूपायनान्यग्रत एव मुक्त्वा ॥१५॥

प्रत्यर्चितोऽसौ मुनिना च तेन
नृपो बभूवातितरां प्रहृष्टः ।
प्रोवाच तं चापि मुनीश्वरं वै
राजेति वाक्यं स्वगणानुयातम् ॥१६॥

अनुग्रहं कर्तुमिहार्हसि त्वं
मह्यं महात्मन् शुभमन्त्रदानात् ।
राज्ञो वचश्चेत्थमनल्पसिद्धि–
र्मुनिर्निशम्येदमुवाच भूपम् ॥१७॥

त्रिविक्रमं देवमहं प्रपूज्य
दास्यामि मन्त्रं त्वमिह क्षितीश ।
तुभ्यं हि तावत्स्वजनानुयातः
स्थितो भवामात्यगणैश्च युक्तः ॥१८॥

(23a) राजानमित्थं स मुनिस्तमुक्त्वा
त्रिविक्रमं पूजयितुं चचाल ।
शिष्यैः परीतः स नृपश्च तत्र
मठे स्थितोऽभूत्स्वगणोपयुक्तः ॥१९॥

स गोमतीवारिणि शिष्यवृन्दैः
स्नात्वा समं द्वारवतीपतिं च ।
त्रिविक्रमं देवमपूजयद्वै
मुनिर्महात्मा विविधोपचारैः ॥२०॥

स पूजयित्वा विधिवत्त्रिलोकी–
नाथं मुनिर्देवमनल्पसिद्धिः ।
त्रिविक्रमं स्वं मठमाजगाम
शिष्यैः परीतः क्षितिपेन दृष्टः ॥२१॥

ततो मठं स्वं स मुनिः प्रविश्य
राज्ञे ददौ मन्त्रमनल्पसिद्धिम् ।
द्रव्यं स दत्वा गुरुदक्षिणार्थे
बहु, स्वकं सद्म ययौ स हृष्टः ॥२२॥

इत्थं मुनीशस्य बभूव शिष्यो
नृपः स चामात्यगणानुयातः।
राज्ञार्चितोऽसौ स्वमठेऽवसद्वै
स्वशिष्ययुक्तः परिपूर्णलक्ष्मीः ॥२३॥

मुनिर्मठे स्वे तु वसंश्च चक्रेऽ-
निवारितान्नस्य सुहृष्टचित्तः।
संकल्पमारादखिलार्थसिद्धिः
क्षितीश्वरेणानुदिनं नियुक्तः ॥२४॥

स द्वारकायां स्वमठे वसंस्तु
कृत्वान्नदानस्य मुनिः प्रहृष्टः।
संकल्पमत्रापि चकार दान-
मन्नस्य सिद्धेश्वरवन्द्यपादः ॥२५॥

ववर्ष सोऽन्नेन महागुणेन
पक्वेन वाऽऽमेन च शिष्ययुक्तः।
यथाम्बुदो वारिभिरत्र लोके
कृपासमुद्रः सकलार्थसिद्धिः ॥२६॥

जनेप्सितार्थं प्रददाति नित्य-
मौदार्यवारांनिधिरार्यवन्द्यः।
मुनीश्वरः शिष्यगणानुयात-
स्त्रैलोक्यदुःखापह ईश्वरश्च ॥२७॥

इत्थं कुर्वंस्त्रि (23a) भुवनजनं सौख्यपात्रं मुनीशोऽ-
त्यर्थं शिष्यैः परित उरुभिः सूपविष्टैस्त्वशोभन्।
दुर्वासाः श्रीगुणगणयशोधामनामाधिपत्य-
मध्यास्तेऽसौ तपसि नितरां संस्थितानां मुनीनाम् ॥२८॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कविश्रीरघुनाथविरचिते दुर्वाससोऽवारितान्नदानो नाम त्रयोदशः सर्गः॥

१४

अथैकदा तापससंघवन्द्यं
दुर्वाससं ज्ञानतपोनिधानम्।
शिष्याः प्रबद्धाञ्जलयोऽन्वपृच्छ-
ञ्जिज्ञासवस्तत्त्वमिति प्रणम्य ॥१॥

स्वामिञ्जनानां विविधा हि चेष्टाः
कस्माद् भवन्तीह मुनीशवन्द्य।
षट्चक्रभेदश्च कथं विभो नः
कुत्र स्थितानीति वदस्व शिष्यान् ॥२॥

चक्रेषु देवाः कति सन्ति युक्ता
नाम्ना च के तापससंघसेव्य ।
जीवस्त्वहोरात्रमनुश्वसन्वै
श्वासान्करोतीह कतिप्रमाणान् ।।३।।

इति स्म पृष्टो मुनिनायकोऽसौ
शिष्यैः स तानाह सुहृष्टचित्तः ।
सुखं स्थितो लोकहिताय चक्र–
भेदं स्वदेहानुगतं महात्मा ।।४।।

शिष्याः शृणुध्वं जगतो हिताय
षट्चक्रभेदं विधिवद् ब्रवीमि ।
यं भेदमाज्ञाय जनः सुखेन
गच्छेत्परं ब्रह्म निरामयं वै ।।५।।

पत्राणि चक्रेष्वपि शास्त्रतो वै
यावन्ति पुत्राः प्रतिपादिता(नि) ।
षट्सु प्रवक्ष्यामि च चक्रदेवान्
देहस्थितेषु क्रमशः शृणुध्वम् ।।६।।

स्थानानि षण्णां विधिवद् ब्र(24a)वीमि
शिष्याः शृणुध्वं शुभवासनातः ।
जाप्यं च तेषु प्रतिपादितं च–
क्राणां मुनीशा जगतो हिताय ।।७।।

षट्चक्रसंस्थान्खलु मातृकार्णान्
षट्चक्रवर्णांश्च विशुद्धदेहाः ।
ब्रवीम्यहोरात्रत एव जीवः
श्वासांश्च यावत्प्रकरोति हंसः ।।८।।

ध्यानं च हंसस्य तपःसुनिष्ठाः
प्रवच्मि शास्त्रानुगतं शुभाङ्गाः ।
शारीरकं सर्वमिदं शृणुध्वं
श्रुत्वा च यत्पापभयात्प्रमुच्येत् ।।९।।

हृत्पङ्कजकृतावासो हंसो जीवः परात्परः ।
हंस हंसेति हंसेति स्वात्मानं जपते सदा ।।१०।।
बहिर्याति हकारेण सकारेण विशत्यपि ।
सोऽहं हंसेति हंसोऽयं जीवो जपति सर्वदा ।।११।।
अहोरात्रेण जीवोऽयमितिसंख्यं प्रजल्पति ।
एकविंशत्सहस्रं तु षट्शतैरधिकं विभुः ।।१२।।
हृत्पद्मकृतसंवासो हंसो नित्यं प्रजल्पति ।
इमं मन्त्रं महामन्त्रं सर्वसिद्धिप्रदायकम् ।।१३।।

मन्त्रदेवान्प्रवक्ष्यामि तच्छक्तीश्च विधानतः ।
संख्यां चैव तु मन्त्रस्य समर्पणविधेः क्रमात् ॥१४॥
एतत्सर्वं प्रवक्ष्यामि शृणुध्वं कृतसौहृदाः ।
यत्तु सर्वं नरो ज्ञात्वा कृतकृत्योऽभिजायते ॥१५॥
गुद आधारचक्रं स्याद्रक्तवर्णं चतुर्दलम् ।
चतुर्मातृकसंयुक्तं दशखं समितिक्रमात् ॥१६॥
ज्ञेयो गणपतिर्देवः सिद्धिबुद्धी च शक्तिके ।
अत्र चक्रे पुरा प्रोक्ते मुनिभिस्तत्त्वदर्शिभिः ॥१७॥
अत्र देवं गणपतिं विधिवत्पूज्य साधकः ।
निवेदयेत्षट्शतं वै जपं विघ्नोपशान्तये ॥१८॥
स्वाधिष्ठानं तु चक्रं स्याल्लिङ्गे (24b) षट्दलसंयुतम् ।
पीतवर्णं च षड्भिस्तु मातृकार्णैरुपस्कृतम् ॥१९॥
वकारादिलकारान्तैर्मस्तके बिन्दुभूषितैः ।
अत्र ब्रह्माधिदवं (देवः) स्यात्सावित्री शक्तिरुच्यते ॥२०॥
अत्र संपूज्य विधिवद् ब्रह्माणं साधकोत्तमः ।
निवेदयेत्षट्सहस्रं जपं सृष्टयर्थमेव तु ॥२१॥
नाभ्यां च तद्वन्मणिपूरकाख्यं
चक्रं तु नीलोत्पलसंनिभं तत् ।
दलैरुपेतं दशभिस्तु वर्णै–
× × विराजद्दशभिर्धफान्तैः ॥२२॥
अत्र देवो महाविष्णुरुच्यते शक्तिरिन्दिरा ।
संपूजयेन्महाभक्त्या विष्णुमत्र च मानवः ॥२३॥
संपूज्य विधिवद् भक्त्या महाविष्णुं नरोत्तमः ।
निवेदयेत्षट्सहस्रं जपमात्मविशुद्धये ॥२४॥
हृदयेऽनाहतं चक्रं श्वेतवर्णं महत्प्रभम् ।
दलैर्द्वादशभिर्युक्तं द्वादशार्णैः कठान्तगैः ॥२५॥
मातृकाया बिन्दुयुक्तैरत्र दैवतमुच्यते ।
रुद्रो भवानी शक्तिश्च पुरा प्रोक्ता मुमुक्षुभिः ॥२६॥
शिवमत्र तु संपूज्य विधिवन्मुनिपुंगवः ।
निवेदयेत्षट्सहस्रं जपं सर्वार्थसिद्धये ॥२७॥
कण्ठे विशुद्धिचक्रं तु धूम्रवर्णं विराजते ।
दलैः षोडशभिर्युक्तं तच्चक्रं परिकीर्तितम् ॥२८॥
स्वरैः षोडशभिर्युक्तं जीवस्तत्राधिदैवतम् ।
अविद्याशक्तिरत्रोक्ता मुनिभिस्तत्त्वदर्शिभिः ॥२९॥
अत्र जीवं विधानेन संपूज्य मुनिपुंगवः ।
जपमेकं सहस्रं तु जापकः संनिवेदयेत् ॥३०॥

आज्ञाचक्रं च भ्रूमध्ये स्थितं माणिक्यसंनिभम् ।
द्विदलं हंक्षमिति च मातृकार्णोप (25a) शोभितम् ॥३१॥
देवः स्यात्परमात्मात्र माया शक्तिरुदाहृता ।
मुनिभिः सनकाद्यैस्तु मुनिभिस्तत्त्वदर्शिभिः ॥३२॥
संपूज्य परमात्मानमत्र चक्रे मुनीश्वराः ।
जपमेकं सहस्रं तु जापकः संनिवेदयेत् ॥३३॥
गोल्हाटमण्डले (?) तद्वद् ब्रह्मरन्ध्राख्यमुत्तमम् ।
चक्रं प्रकाशबहुलं सर्ववर्णसमन्वितम् ॥३४॥
सहस्रैस्तु दलैर्युक्तं मातृकार्णैरुपस्कृतम् ।
स्वरैश्च सर्वैः संयुक्तं तच्चक्रं परिकीर्तितम् ॥३५॥
अत्र देवो गुरुर्ज्ञेयो ज्ञानं शक्तिः प्रकीर्तिता ।
ज्ञानिभिर्मुनिभिश्चात्र देहज्ञानपरायणैः ॥३६॥
अत्र संपूज्य विधिवद् गुरुं तस्मै मुनीश्वरः ।
निवेदयेत्सहस्रं तु जपं सर्वार्थसिद्धये ॥३७॥
शरीरचक्रस्थितिमित्थमत्र
यो वेद नित्यं पुरुषस्तु धीमान् ।
जीवस्वरूपं च महाभिमन्त्रं
जीवेन नित्यं परिजप्यमानम् ॥३८॥
स ज्ञानवान्मुक्तसमस्तबन्धः
सुखेन ब्रह्म प्रतियाति सिद्धः ।
यश्चक्रभेदं च पुमान् शृणोति
जीवन्विमुक्तः स भवेन्मृषा न ॥३९॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कविश्रीरघुनाथविरचिते दुर्वाससा कृतषट्चक्रनिरूपणो नाम चतुर्दशः सर्गः ॥

१५

अथ प्रवक्ष्यामि विषादहर्ष–
स्वप्नप्रमादेषु यदस्ति तथ्यम् ।
तत्कारणं लोकहिताय शिष्या
नृणां विदित्वैतदघाद्विमुच्येत् ॥१॥
हृत्कञ्जमध्येऽष्टदलं हि पद्मं
रेखात्रयोद्भासितमुच्चकास्ति ।
(25b) जीवस्तु तन्मध्यगतोऽस्ति हंसो
ज्योतिःस्वरूपः सततं प्रसिद्धः ॥२॥
तत्र स्थितोऽसौ जीवात्मा चेष्टां संसारकारिणीम् ।
करोति मन्यते चाहं कर्तेति सततं तु सः ॥३॥

तस्मिन्पद्मे स्थितो जीवो यदा पूर्वदले रमेत् ।
तद्दलं श्वेतवर्णं तु तदा धर्मे मतिर्भवेत् ॥४॥
आग्नेये तु दले जीवो यदा विश्रमते विभुः ।
रक्तवर्णं च तत् ज्ञेयं दलं तप्तायसोपमम् ॥५॥
तदा ह्यालस्यनिद्रायां मतिर्भवति नान्यदा ।
यदा च दक्षिणदले जीवो विश्राममाचरेत् ॥६॥
तद्दलं कृष्णवर्णं स्यात्तदा द्वेषे मतिर्भवेत् ।
क्रोधे चैव तु जीवस्य तद्दलस्य प्रभावतः ॥७॥
यदा दले नैऋतिगे जीवो विश्राममाचरेत् ।
तद्दलं नीलवर्णं तु तदा पापमतिर्भवेत् ॥८॥
यदा च पश्चिमदले जीवः क्रीडां करोति हि ।
तद्दलं स्फाटिकाभं तु तदा क्रीडामतिर्भवेत् ॥९॥
यदा च वायव्यदले हंसः क्रीडां समाचरेत् ।
तद्दलं धूम्रवर्णं तु मुनिभिः परिकीर्तितम् ॥१०॥
तदा गमनउच्चाटे (?) वैराग्ये च मतिर्भवेत् ।
जीवानां भुवि लोके तु नात्र कार्या विचारणा ॥११॥
यदोत्तरदले जीवो रमते स्वेच्छया विभुः ।
तद्दलं पीतवर्णं च साधुभिः परिकीर्तितम् ॥१२॥
शृङ्गारे च सुखे चैव भोगे च परिजायते ।
नृणां बुद्धिर्न संदेहः कार्यो भुवि नरोत्तमः ॥१३॥
यदेशानदले जीवः स्थितः क्रीडति लीलया ।
वैडूर्यसदृशं तच्च दलं सद्भिः प्रकीर्तितम् ॥१४॥
कृपायां चै (26a) व दाने च दयायां जायते मतिः ।
नृणामिह न संदेहः प्रकर्तव्यो महाजनैः ॥१५॥
यदासौ दलसंधिं तु जीवो विश्रमते विभुः ।
तदा हि श्लेष्मपित्तादिमहाव्याधिभयं भवेत् ॥१६॥
यदासौ पद्ममध्यं तु तिष्ठते हंससंज्ञकः ।
तदानन्दमवाप्नोति जीवोऽयं नास्ति संशयः ॥१७॥
तदा हसत्यसौ जीवो नृत्यति ह्यपि गायति ।
वलति क्रीडते नित्यं तेनासौ श्रमवान्भवेत् ॥१८॥
श्रमनिर्हरणायासौ हंसो रेखां श्रयत्यथ ।
प्रथमा सा तु बन्धूकपुष्पवर्णा च रेखका ॥१९॥
निद्रावस्थां तदा जीवः प्राप्नोतीति विनिश्चयः ।
निद्रावस्थां श्रितो जीवो विविधां कल्पनां भजेत् ॥२०॥
दृष्टश्रुतानुभावेन कुरुते कल्पनां नरः ।
कल्पनाकुलचित्तस्तु हंसः स्यात् श्रमकर्शितः ॥२१॥

श्रमनिर्हरणायासौ पुना रेखां श्रितो भवेत् ।
द्वितीयां हंससंज्ञोऽसौ जीवः संसारसंस्थितः ॥२२॥
इन्द्रगोपनिभा रेखा द्वितीया परिकीर्तिता ।
तदा सुषुप्त्यवस्था स्यान्नृणां नास्त्यत्र संशयः ॥२३॥
सा शुद्धा निर्मला शान्तावस्था तु परिकीर्तिता ।
तदा जीवस्य भवति परमं सुखमुत्तमम् ॥२४॥
यदा तृतीयरेखायां क्रीडन्हंसोऽभियाति हि ।
सा रेखा पद्मवर्णाभा साधुभिः परिकीर्तिता ॥२५॥
तदावस्था तुरीया स्यान्नित्यबोधस्वरूपिणी ।
सावस्था विदिता लोके हंसस्तत्स्थः सुखी भवेत् ॥२६॥
तत्रस्थः खलु हंसोऽसावात्मानं विन्दते परम् ।
कृतकृत्यो (26b) भवेद्धंसस्ततः किंचन न स्मरेत् ॥२७॥
चक्रं मयैतत्सर्वं हि यत्पृष्टं मां मुनीश्वराः ।
यदन्यच्छ्रोतुकामाः स्थ तत्पृच्छन्तु ममाज्ञया ॥२८॥
हेतुं जनानां विविधासु चेष्टा–
सूक्तं निशम्य प्रभुणा सुहृष्टाः ।
दुर्वाससं प्रोचुरिति प्रणम्य
पुनः प्रबद्धाञ्जलयस्तु शिष्याः ॥२९॥
किं योगकर्मात्र मनुष्यलोके
प्रोक्तं प्रभो सर्वसुखैकधाम ।
अष्टाङ्गयोगश्च कथं भवेद्वै
तन्नः समाचक्ष्व दयानिधान ॥३०॥
महामुद्राः कति प्रोक्ता मुनीनां सिद्धिदायकाः ।
प्राणायामश्च कतिधा लोकेऽस्मिन्कथितो भवेत् ॥३१॥
इत्थं स शिष्यैः परिपृष्ट एतान्
मुनिर्बभाषे करुणैकधाम ।
योगाध्वनः पारगचित्तवृत्ति–
र्भो भोः सुशिष्या वचनं शृणुध्वम् ॥३२॥
प्रव्रज्य गेहाज्जनसङ्गहीने
देशे स्थितो योगमुपाश्रयेत ।
सुखासनस्थः समदृक् प्रशान्तः
स्वनासिकाग्रार्पितनेत्रवृत्तिः ॥३३॥
इत्थं प्रकल्प्यासनमात्मनो वै
कुशैण्यवस्त्रैः क्रमतो मुनिः सः ।
पद्मासनस्थः स्वशरीरकं च
समं सुबिभ्रन् प्रणवं जपेत ॥३४॥

तत्रासने मौनधरः स योगी
प्राणान्नियम्यानवलोकयंश्च ।
दिशः स्थितः पूरककुम्भकादि–
क्रमेण चित्ते प्रणवं विदध्यात् ॥३५॥

ने * रीनालको जायिकर्मोदितं
भाटिका योगमार्गप्रशस्ता ।
रेचकः पूरकः कुम्भकश्चेति भोः
प्राणरोधप्रकाराः स्मृताः स्युः ॥३६ ॥

महामुद्रकाः पञ्च चापि प्रशस्ताः
पुन(27a)स्ता ब्रवाणि प्रयत्नात् शृणुध्वम् ।
चाचरी भोजरी खेचरीति प्रशस्तो–
न्मनीमुद्रकाऽगोचरीति ॥३७॥

शंखमुद्रा पुनर्धेनुमुद्रा पुनः–
र्ब्रह्ममुद्रा पुनर्नागमुद्रा * * ।
ज्ञानमुद्रेति पञ्चान्यमुद्राः खलु
ज्ञानिभिर्मुक्तये स्युः प्रदिष्टाः ॥३८॥

आसनं प्राणरोधश्च प्रत्यक् –
समुद्धारणं चेन्द्रियाणां च शिष्याः ।
ध्यानमुक्तः पुनर्धारणा वै समाधिः
पुनश्चेत्थमष्टाङ्गयोगः [प्रदिष्टः] ॥३९॥

दुर्वाससेत्थं प्रतिबोधितास्ते
शिष्याः प्रहृष्टाः सुतरां बभूवुः ।
गुरूपदिष्टं शुभयोगमार्गं
समभ्यसन्तो विगताभिमानाः ॥४०॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कवि श्रीरघुनाथविरचिते दुर्वाससः शिष्यप्रतिबोधो नाम पञ्चदशः सर्गः ॥

१६

अथ प्रवक्ष्यामि मुनीश्वरस्य
दुर्वाससोऽत्रेर्गृहजन्मवृत्तम् ।
यद् भक्तिभावेन नरो निशम्य
पापात्प्रमुच्येन्महतोऽपि सद्यः ॥१॥

सर्गाय संनोदित अत्रिरत्र
पित्रा विधात्रा परमे स्थितोऽभूत् ।
मुनिः समागत्य स भूमिलोके
तपस्यनर्घ्ये महतां महीयान् ॥२॥

स्त्रिया समं मौनपरायणोऽसौ
विश्वस्य बीजं मनसि स्मरंश्च ।
सर्गस्य वृद्ध्यै स्वकृतस्य लोके
मुनिश्च सः संततिलब्धये च ॥३॥

युग्मम् ।

स शीतकालेऽम्बुगगात्रयष्टिः
ग्रीष्मे च पञ्चाग्निपरायणोऽभूत् ।
आकाशवासी पुनरास वर्षा–
स्वेकाग्रचित्तः खलु सर्गवृद्ध्यै ॥४॥
इत्थं तपस्युग्रतरे (27b) स्थितस्य
स्त्रिया समं संततिहेतवेऽत्रेः ।
संवत्सरा योगपरायणस्य
नित्यं समीयुर्बहवस्तु तस्य ॥५॥
काले गते स्त्रीसहितस्य तस्य
तपःस्थितस्यात्रिमुनेरनन्ते ।
ब्रह्मेशविष्ण्वाद्यसुराः समीयुः
कृपाप्लुताश्चाश्रममेककालम् ॥६॥
गीर्वाणसंसेवितपादपद्मा–
स्तमूचिरेऽत्रिं परमे स्थितं वै ।
तपस्यनर्घ्ये विबुधास्त्रयस्ते –
ऽस्मभ्यं वरं भो वृणु चित्तगं त्वम् ॥७॥
इत्थं च तेषां वचनं निशम्य
मुनिः स कौतूहलयुक्तचेताः ।
कथं मयैकस्य समर्पयेयु–
स्त्रयः पुमांसः कृतयेद्यवोचत् ॥८॥
अत्रेर्वचस्ते विबुधा निशम्य
त्रयो जगुस्तं मुनिमादरेण ।
वयं त्रयोऽप्येकतनुर्द्विजेन्द्रा–
स्मभ्यं वरं त्वं वृणु मानसस्थम् ॥९॥
इत्थं निशम्य स मुनिर्वचनं त्रयाणां
देवेश्वराभिनतपादसरोरुहाणाम् ।
श्रीविष्णुशंकरचतुर्वदनाभिधानां
तान्प्रत्युवाच शिरसा प्रणिपत्य हृष्टः ॥१०॥
भोऽधीश्वराः संततिमत्र देवाः
संप्रार्थये वः सदृशीं प्रणम्य ।
जाताः प्रसन्ना यदि मह्यमेतं
मनोरथं पूरयत प्रसन्नाः ॥११॥

वरं निशम्यात्रिवृतं त्रयोऽपि
देवास्तपस्तोषपरीतचित्ताः ।
तथेति तं प्रोचुरनल्पसिद्धि
गीर्वाणसंघैरुपसेवितास्ते ॥१२॥

ततोऽत्रिणा हृष्टतरेण भक्त्या
संपूजिता धाम ययुः प्रसन्नाः ।
त्रयः स्वसैन्यानुगताः प्रहृष्टाः
ब्रह्मेशविष्ण्वाख्यविराजमानाः ॥१३॥

ततस्त्रयोऽपि स्ववचोनिबद्धा
ह्यात्मादृशं (28a) वान्यमलभ्य जग्मुः ।
अपश्यतामत्रिमुनीश्वरस्य
देवेश्वराः स्वांशत अत्र लोके ॥१४॥

चतुर्मुखस्यांशत आस चन्द्रो
दत्तो मुनिर्व्यासकला बभूव ।
शिवस्य चांशस्तु बभूव दुर्वा–
सास्तापसैर्वन्दितपादपद्मः ॥१५॥

इत्थं त्रयोऽप्यत्रिगृहेऽधिनाथाः
प्रजज्ञिरे पुत्रतयामरेशाः ।
तेषां चरित्राणि ब्रवीम्यहं वै
दत्तस्य चन्द्रस्य च शंभुमूर्तेः ॥१६॥

दत्तस्तपोयोगपरायणोऽभूत्
ज्योतिर्गणानामधिपो बभूव ।
चन्द्रश्चतुर्वक्त्रकला च लोके
तपःप्रभावेन(ण) वनस्पतीनाम् ॥१७॥

यः शंकरस्यांश इह प्रजज्ञे
दुर्वासिसं तं मुनयो वदन्ति ।
नाम्ना च तेनापि महीतलेऽस्मिन्
महत्तपश्चीर्णमनल्पकालम् ॥१८॥

सत्यसंज्ञे युगे पूर्वमित्थं मुनिः
प्राविरासीदनेनैव नाम्ना** ।
युगं तत्त्वयोगाध्वना संनिनाय
प्रभुः शंकरस्यांश अस्मिन् हि लोके ॥१९॥

त्रेतायुगेऽसौ मुनिराजगाम
गिरिं मुनिर्मन्दरसंज्ञकं च ।
तत्कन्दरायां कृतसंनिवासो
बभूव योगार्पितचित्तवृत्तिः ॥२०॥

इत्थं मन्दरसंज्ञके गिरिवरे दुर्वाससोऽधीशितुः
त्रेताख्यं युगमत्यगान्निवसतस्तत्कन्दरायां मुनेः ।
शश्वद्ध्यानपरायणस्य सततं प्राणान्नियम्यात्मनः
सिद्धेः पूरककुम्भकादिक्रमतो नो रेचकं कुर्वतः ॥२१॥

द्वापराख्ये युगे संप्रवृत्ते मुनिः
स्वर्गलोकं चकारात्मबुद्धिम्** ।
स वै गन्तुमिन्द्रस्य सद्म श्रियं च
प्रवव्राज तस्माच्च देशान्मुनीन्द्रः ॥२२॥

(28b) स जाह्नवीस्रोतसि संनिमज्य
तत्स्रोतसासौ दिवमाजगाम ।
यावद् द्युनद्यां मुनिराजगाम
क्रीडन्त्य एतं सुरकन्यकास्तु ॥२३॥

तावच्च दृष्ट्वा सहसा कुमार्यो
व्रीडाभियुक्ता मुनिसंघवन्द्यम् ।
वासांसि देहे परितो विधाय
मुनिं तमानर्चुरनल्पसिद्धिम् ॥२४॥

युग्मम् ।

सरोजपत्रोद्ग्रथितं ददौ च
तस्मै मुनीशाय वरासनं हि ।
एका तु नद्याः सरसीरुहाणि
मुनेः प्रपूजार्थमुपाजहार ॥२५॥

पूजोपहारं च चकार चान्या
मुनीश्वरं पूजयितुं प्रहृष्टा ।
इत्थं प्रकल्प्यार्चनवस्तुजातं
गीर्वाणकन्याः समपूजयंस्तम् ॥२६॥

सर्वाः समानर्चुरनुक्रमेण
दुर्वाससं देवकुमारिकास्ताः ।
तं पूजयित्वा विधिवन्मुनीशं
ताश्च प्रबद्धाञ्जलयः प्रणेमुः ॥२७॥

नत्वा मुनीशं विधिवत्प्रहृष्टाः
दुर्वाससं संप्रति देवकन्याः ।
तस्थुः प्रबद्धाञ्जलयोऽग्रतस्तु
मुनेः कुमार्यः कृतसौहृदास्ताः ॥२८॥

संपूजितस्ताभिरनर्घ्यशील-
स्ताभ्यः प्रसन्नः प्रबभूव चोचे ।
असौ मुनिस्ता विबुधेश्वराणां
पुत्र्यः प्रसन्नोऽस्मि वरं वृणुध्वम् ॥२९॥

अप्रार्थितं तावदिमं ददामि
वरं कुमार्यः खलु हृष्टचित्तः ।
अखण्डसौभाग्यमिति प्रसादा–
न्ममैव वः पूजनतः सुतुष्टेः ॥३०॥

दुर्वाससेत्थं स्वयमेव दत्ते
वरे कुमार्यः स्वहृदि प्रतिष्ठान् ।
वरान्मुनिं तं परिवव्रिरे च
मुनिस्तथेत्याह स हृष्टचित्तः ॥३१॥

ताभ्यः प्रदा(29a)याथ वरान्मुनीशः
सुपूजितस्ताभिरनल्पसिद्धिः ।
स वासवद्वारमुपाजगाम
द्वारस्थमागत्य तदेत्यवोचत् ॥३२॥

भो द्वारपाल त्रिदशेश्वराय
मामागतं सूचय तत्र गत्वा ।
शचीपतिं सोऽथ तदाज्ञयागा–
दिन्द्रं च गत्वावददागतं तम् ॥३३॥

दुर्वाससं स्वं भवनं प्रयातं
स द्वारयोक्ता सुतरां प्रहृष्टः ।
आयाति यावत्खलु संमुखोऽसौ
द्वारि व्यतिष्ठन्मुनिरस्य तावत् ॥३४॥

निशम्य स द्वारपवाक्यतस्तं
दुर्वाससं स्वं भवनं प्रयातम् ।
सुरैः समं हृष्टतरो बभूव
प्रत्युज्जगामाथ च तं स[दः]स्थः ॥३५॥

दुर्वाससं संमुखमेत्य देवः
सहस्रनेत्रः प्रणिपत्य भूमौ ।
प्रवेशयामास समं हि देवैः
सभां मुनिं मानपुरःसरं तम् ॥३६॥

सभां प्रवेश्याथ मुनिं तमिन्द्रः
सिंहासने स्वे च निवेश्य हृष्टः ।
पूजोपहारैर्विविधैर्महात्मा
संपूजयामास मुदा मुनीशम् ॥३७॥

स पूजयित्वा विधिवन्मुनीशं
दुर्वाससं चामरपाणिरारात् ।
संवीजयामास पपाठ चेदं
स्तोत्रं च तं सुराधिनाथः ॥३८॥

ज्ञानावबोधैकरसेन पूर्ण–
स्तत्त्वार्थदर्शी करुणासमुद्रः ।
योऽष्टाङ्गयोगं विधिवच्च वेत्ति
दुर्वाससं तं सततं भजेऽहम् ।।३९।।

मुनीन्द्रसंसेवितपादपीठो
ज्ञानावधूताखिलभेददृष्टिः ।
यः सर्वदृक् योगपथानुयायी
दुर्वाससं तं सततं भजेऽहम् ।।४०।।

पद्मासनाद्यासनभेदवेत्ता
यः सर्वमुद्रा विधिवच्च वेद ।
सदा चिदानन्दरसे नि(29a)मग्नो
दुर्वाससं तं सततं भजेऽहम् ।।४१।।

संसारवारांणि(नि)धिकर्णधारो
निरस्तभेदोऽखिलशास्त्रदृष्टिः ।
निरस्तदेहाद्यभिमानको यो
दुर्वाससं तं सततं भजेऽहम् ।।४२।।

द्वन्द्वैर्विमुक्तः सुखदुःखसंज्ञैः
स्वनासिकाग्रार्पितनेत्रवृत्तिः ।
ब्रह्मार्पितान्तर्हृदयो मुनिर्यो
दुर्वाससं तं सततं भजेऽहम् ।।४३।।

यो ज्ञानमुद्रां सततं दधानो
ब्रह्मस्वरूपानुभवेन हृष्टः ।
वर्वर्ति लोके विशदाशयो यो
दुर्वाससं तं सततं भजेऽहम् ।।४४।।

ब्रह्मस्वरूपानुभवेन नित्यं
जन्मादिसंशोषितषड्विकारः ।
ज्ञानस्वरूपः खलु दुर्विभाव्यो
दुर्वाससं तं सततं भजेऽहम् ।।४५।।

अहरहरनवद्यामिन्द्रक्लृप्तां स्तुतिं यः
पठति विशदबुद्ध्या भावसंयुक्तचेताः ।
स नवनवविलासान्भूमिलोके तु भुक्त्वा
दिवि वसति सुभूषाभूषितः पूर्णशोभः।।४६।।

सहस्रनेत्रो मुनिमित्थमारात्
स्तुत्वानमद्दण्डवदादरेण ।
समं सुरैश्चाथ मुनीश्वराय
समर्पयामास सुरेन्द्रलोकम् ।।४७।।

स पूजितो हृष्टतरो बभूव
मुनिः सुरेन्द्रेण सुराधिपत्यम् ।
स्वस्म विलोक्यैनमुवाच वाक्यं
भो भो सुरेन्द्रावहितः शृणु त्वम् ॥४८॥

त्वत्पूजितोऽहं त्रिदशाधिनाथ
हृष्टोऽस्मि दानात्किमु राज्यलक्ष्म्याः ।
तथापि तां गृह्य च तुभ्यमेव
प्रत्यर्पयामि त्रिदशाधिनाथ ॥४९॥

तथेति वाक्यं मुनिनायकस्य
दुर्वाससो गृह्य स वृत्रहा वै ।
बद्धाञ्जलिः सन्नुपसंप्रहृष्ट–
(30a) स्तस्थौ मुनिं तं त्रिदशाधिनाथः ॥५०॥

इति श्रीमहामुनिसुतस्य दुर्वाससः काव्ये रसिकरमणसंज्ञे कवि श्रीरघुनाथविरचिते दुर्वाससश्चतुर्युगचरितनिरूपणो नाम षोडशः सर्गः ॥

१७

अथ शक्रसुपूजितो मुनि–
र्भुवमागम्य मधोर्वने शुभे ।
परमे तपसि स्थितोऽभव–
ज्जनसंवर्जितदेशतो विभुः ॥१॥

तपःस्थितस्यास्य मुनेस्तु तस्य
दुर्वाससोऽगुर्बहवस्तु मासाः ।
तत्रैकदा यादवदारकास्तु
विहर्तुकामाः समुपेयुरारात् ॥२॥

अश्वाधिरूढाः सुशिरोविभूषा
बलात्तुरंगैश्चलकुण्डलाश्च ।
ताम्बूलपूर्णाननचारुदन्ताः
प्रवालरक्तोष्ठपुटाः प्रहृष्टाः ॥३॥

केयूरहारादिसुभूषणाढ्याः
सुमौलिपुष्पप्रकराभिरामाः ।
कस्तूरिकार्चितचारुदेहाः
प्रसूनमालाधिरुचः प्रगल्भाः ॥४॥

मुक्ताफलोद्भासितहृत्प्रदेशाः
सुपद्मपत्रायतचारुनेत्राः
विशालवक्षःस्थलरम्यदेहाः
क्रीडोपहारं विविधं प्रगृह्य ॥५॥

कुलकम् ।

तस्मिन्वने यादवराजपुत्रा
नानाविनोदैः परितो विजह्रुः ।
ते कन्दुकक्रीडनकादिभिर्वै
प्रहृष्टचित्ताः प्रतिबद्धरागाः ॥६॥

ते यादवा वै विविधैर्विनोदैः
क्रीडन्त आराद्ददृशुस्तपोऽब्धिम् ।
दुर्वाससं ध्याननिमीलिताक्षं
तपोज्ज्वलद्देहमनल्पसिद्धिम् ॥७॥

दृष्ट्वा मुनिं तं प्रणिपत्य हृष्टाः
कृत्वा विनोदं विविधं पुनस्ते ।
ययुः स्वसद्मानि मुनिं (30b) तमूचुः
स्थितं तपस्युग्रतरे जनेभ्यः ॥८॥

ते यादवा बालकभाषितानि
न श्रद्दधुः को मुनिरत्र तिष्ठेत् ।
इति स्म संदेहसमाकुलांस्तान्
बालाः पुनः प्रोचुरिति प्रहृष्टाः ॥९॥

यूयं न चेन्नो वचनेषु श्रद्धां
कुर्वन्त्यतस्तद्वनमेव गत्वा ।
संदर्शयामो मुनिमत्र सिद्ध-
मागच्छतानेन पथा विमूढाः ॥१०॥

ते यादवा बालकदर्शितेन
मार्गेण तत्काननमीयुरेते ।
तथोग्रसेनोद्धवसात्यकीन्द्र-
रामाच्युताद्याः सकलाः प्रहृष्टाः ॥११॥

तद्वनं समुपगम्य यादवा
बालदर्शितपथा सुबुद्धयः ।
तं मुनिं ददृशुरिद्धतेजसं
तुष्टुवुर्विविधसंस्तवैश्च तम् ॥१२॥

तेषां बभूव स्तुतिभिर्ह्यनल्पः
कोलाहलोऽथाशु मुनिर्महात्मा ।
श्रुत्वोन्निमील्यात्मसमाधियोगा-
न्निवर्त्य नेत्रं स च तान्ददर्श ॥१३॥

बद्धाञ्जलींस्तान्प्रणतांस्तु दृष्ट्वा
मुनिर्बभाषे च वनं महात्मा ।
के यूयमत्र स्थितमप्यजानन्
कथं च मां भो पुरुषप्रवीराः ॥१४॥

दुर्वाससेत्थं मुनिना सुहृ(पृ)ष्टा–
स्तं वै प्रणम्योचुरिति प्रहृष्टाः ।
वयं विभो यादवकाः स्म भूमौ
चतुर्षु दिक्षु प्रथितानुभावाः ॥१५॥
विहर्तुकामाः खलु बालका वै
समागतास्त्वां मुनिमत्र दृष्ट्वा ।
समाचचक्षुः पुरमेत्य सर्वेऽ–
स्मभ्यं मुनेऽत्राभिगतास्ततश्च ॥१६॥
त्वं तापसात्मानमपि प्रचक्ष्व
नः श्रोतुकामान्कतमोऽसि लोके ।
ऋषीश्वराणाममलात्मनां त–
मित्यन्वपृच्छन् यदवो मुनीशम् ॥१७॥
इत्थं स तै(31 a)र्यादवकैस्तु पृष्टः
स्वात्मानमत्रेर्भवनेऽभिजातम् ।
मुनिः प्रहृष्टः कथयांबभूव
दुर्वा(स)सं तान्सततं हि नाम्ना ॥१८॥
तद्वाक्यतस्तं मुनिसिद्धवन्द्यं
दुर्वाससं हृष्टतरा बभूवुः ।
प्रणम्य ते विज्ञपयांबभूवुः
पुनः प्रबद्धाञ्जलयो विदित्वा ॥१९॥
मुनीश नो भाग्यवशेन दृष्ट–
स्ततः कृतार्थाः स्म न संशयोऽस्ति ।
पुनीहि नस्तापससिद्धवन्द्य
हर्म्याणि चात्मागमनेन सिद्ध ॥२०॥
शूरसेनादिभिर्यादवैर्वै
मुनिः प्रार्थितोऽङ्गीचकारापि वाक्यम् ।
यादवास्ते गजेन्द्रं समारोप्य तं स्वां
पुरीं संणिन्युः (?) प्रहृष्टाः ॥२१॥
गजेन्द्रपृष्ठे स मुनिश्चकाशे
सिंहासनस्थः कुसुमैः प्रकीर्णः ।
मुक्तासुहाराभिविराजमानः
श्वेतातपत्रेण च शोभमानः ॥२२॥
संवीज्यमानः परितः प्रहृष्टैः
स शूरसेनादिभिरादरेण ।
चन्द्रांशुगौरैर्यदुभिः शुभाङ्गै–
श्च चामरैश्चन्दनचर्चितस्तु ॥२३॥
युग्मम् ।

रथद्विपाश्वैरनुयातमार्गो
यावन्मुनी राजपथं प्रपेदे ।
इत्थं विचेष्टान्य (अ) भवंस्तु ताव-
त्स्त्रीणां मुनिं द्रष्टुमनल्पसिद्धिम् ॥२४॥

स्वलोचनं दक्षिणमञ्जनेन
संरञ्जयित्वा प्रययौ गवाक्षम् ।
वामं शिलाकामविचिन्तयित्वा
काचिद्वहन्ती कुतुकाकुला वै ॥२५॥

काचिन्मृगाक्षी कटिसूत्रकं वै
मुक्ताफलः प्रोद्ग्रथितुं स्थितासीत् ।
चचाल मुक्ताप्रकरं प्रकुर्व-
न्त्यङ्गुष्ठमूले कटिसूत्रशेषा ॥२६॥

काचिच्च बाला किल पाययन्ती
स्तन्यं गवाक्षं प्रति संचचाल ।
(31 b)अपूर्णमेव प्रविधाय बालं
समुत्सुकोत्सङ्गकृतात्मपुत्रा ॥२७॥

काचित्स्थिता साधयितुं स्वकेशान्
बाला तथैव प्रसभं चचाल ।
प्रकुर्वती पुष्पचयैः प्रकीर्णं
मार्गं तु केशाद् गलितैर्मृगाक्षी ॥२८॥

प्रसाधिका संनमितं स्वपाद-
मथार्द्रकालक्तकयुक्तमेव ।
आकृष्य पादान्समलक्तकाङ्कान्
प्रकुर्वती स्त्री प्रचचाल शीघ्रम् ॥२९॥

काचित्पयश्चुल्लिगतं मृगाक्षी
अनुद्वास्य बालाकुलचित्तवृत्तिः ।
ययौ गवाक्षं प्रति द्रष्टुकामा
दुर्वाससं राजपथानुयातम् ॥३०॥

स्वर्णासनात्काचिदनर्ध्यशीला
श्लथद्दुकूला सहसोच्चचाल ।
हस्तेन वासः परिगृह्य हृष्टा
नाभिप्रविष्टाभरणप्रभेण ॥३१॥

ताम्बूलमत्तुं कृतचित्तवृत्तिः
काचिन्मृगाक्षी सहसा चचाल ।
ताम्बूलवल्लीकृतहस्तशोभा
स्वनत्कटिस्वर्णसुसूत्रशेषा ॥३२॥

काचिन्मृगाक्ष्याभरणानि देहे
कृत्वास्थितान्दोलनमात्मगेहे ।
श्रुत्वा मुनिं राजपथेऽनुयातं
द्रष्टुं चचालाभरणाप्यशोभा ॥३३॥

इत्थं समागम्य गवाक्षरन्ध्रान्
स्त्रियः शुभाङ्ग्यो नृपवर्यमार्गे ।
करीन्द्रपृष्ठोपरि राजमानं
तं तापसेशं ददृशुः प्रहृष्टाः ॥३४॥

ता लोचनैस्तापसवक्त्रशोभां
विलोकयन्त्यः परमामवापुः ।
सुनिर्वृतिं तं समवाकिरंश्च
लाजाक्षतैः पुष्पचयेन नार्यः ॥३५॥

इत्थं मुनी राजपथेऽङ्गनाभिः
संकीर्यमाणः कुसुमैः प्रहृष्टैः ।
संवीज्यमानो यदुभिः स्ववीर्यं
गायद्भिरापाद्भुतरा(32 a)जगेहम् ॥३६॥

उत्तीर्य नागाद् गिरिसंनिभात्स
सोपानमार्गेण मुनीशवन्द्यः ।
शूरादिभिर्दत्तकरो नृपस्य
सिंहासनेऽतिष्ठत पूज्यमानः ॥३७॥

नृपासनस्थं मुनिसिद्धवन्द्यं
दुर्वाससं प्रीतहृदः समस्ताः ।
संपूजयामासुरनर्घ्यशीलं
पूजोपहारैर्विविधैस्ततस्ते ॥३८॥

तं पूजयित्वा विधिवन्मुनीशं
दुर्वाससं यादवकाः प्रहृष्टाः ।
तपोनिधानं विविधान्नभक्ष्यैः
प्रणम्य बद्धाञ्जलयोऽवतस्थुः ॥३९॥

स यादवैरित्थमहर्निशं वै
संपूज्यमानो मुनिसिद्धवन्द्यः ।
दिनानि हृष्टः कतिचिन्महात्मा–
वात्सीत्पुरे तत्र मुनिः प्रियार्हः ॥४०॥

तस्मिन्पुरे तस्य मुनीश्वरस्य
दुर्वाससो यादवपूजितस्य ।
कृष्णोऽकरोद् भक्तिमतीव तस्मै
मुनिस्तुतोषाशु ततः स सिद्धः ॥४१॥

अथो मुनिर्यादववन्दितः स
तपः प्रकर्तुं मतिमादधे च ।
सर्वान् यदून्संप्रतिमन्त्र्य हृष्ट–
श्चचाल सर्वैः प्रतिपूजितस्तु ॥४२॥

गच्छन्स कृष्णाय ददौ महात्मा
सत्याशिषं शत्रुजयाय सिद्धः ।
दत्त्वेति तेनापि सुपूजितोऽगा–
द्वनानि तप्तुं परमं तपो वै ॥४३॥

मुनिस्ततः क्वापि च काननस्थः
प्राणान्नियम्यात्मसमाधियुक्तः ।
त्यक्त्वा स्वकं लोकमियाय देहं
तमःपरं यं मुनयो वदन्ति ॥४४॥

तस्य प्रसादात्तु मुनीश्वरस्य
कृष्णेन युद्धेऽतुलविक्रमेण ।
निकन्दिताः शत्रव आत्मनो वै
तस्य प्रसादात्तु जगत्सु पूज्यः ॥४५॥

इति श्रीमहामतिसुतस्य दुर्वाससः काव्ये (32 b) रसिकरमणसंज्ञे कविश्रीरघुनाथविरचिते दुर्वाससश्चतुर्युगनिरूपणो नाम सप्तदशः सर्गः ॥

१८

अथ कलावपि नैमिषकानने
स करुणाकरमिश्रगृहेऽभवत् ।
अभिधया तु तयैव महामते–
रुदररत्नमनल्पतपोनिधिः ॥१॥

प्रव्रज्य गेहान्मुनिना च येन
नृसिंहनाम्नः प्रगृहीत आशु ।
बालेन वै द्वादशवार्षिकेण
संन्यासयोगो मम सोऽस्तु तुष्टः ॥२॥

भूलोकतीर्थानि कृतानि येन
समुद्धृतो यो बृहदश्वसंज्ञः ।
गन्धर्वपुत्रो द्विजशापतस्तु
सोऽयं मुनिर्मेऽस्तु सुहृष्टचित्तः ॥३॥

यो योगमार्गं विधिवन्मुनीशो
वेदात्मसंस्थापितचित्तवृत्तिः ।
शिष्यैः परीतः सततं विभाति
सोऽयं मुनिर्मेऽस्तु सुहृष्टचित्तः ॥४॥

चतुर्ष्वपीत्थं च युगेषु यो वै
शश्वत्प्रकाशीकृतदेहयष्टिः ।
ज्ञानावबोधैकरसे निमग्नः
सोयं मुनिमेऽस्तु सुहृष्टचित्तः ॥५॥

मुकुन्दमिश्रस्य शुभाशयेन
दारिद्र्यदुःखं हृतमाशु येन ।
तीर्थाटनायानुगतेन नित्यं
सोऽयं मुनिर्मेऽस्तु सुहृष्टचित्तः ॥६॥

यः कल्पवृक्षेण समोऽस्ति लोके
न नेप्सितार्थाधिकदानशीलः ।
प्राणस्य मार्गान्विधिवच्च वेद
सोऽयं मुनिर्मेऽस्तु सुहृष्टचित्तः ॥७॥

दुर्वाससा येन कृतं मुनिभ्यो
दानं शुभान्नस्य तु द्वारकायाम् ।
औदार्यसिन्धुर्गुणवारिधिश्च
सोऽयं मुनिर्मेस्तु सुहृष्टचित्तः ॥८॥

धन्येयं जननी महामतिरिति ख्याता क्षितौ सर्वदा
या (33 a) दुर्वाससमत्र पुत्रमबला सूते स्म संविद्गुरुम् ।
प्राचीवोडुपमक्षिकौतुककरं दोषातमोहारिणं
शश्वज्जीवनिकायतापशमनं पूर्णं विना लाञ्छनम् ॥९॥

योऽसौ कल्पमहीरुहस्त्रिजगति ख्यातः फलाकांक्षिणां
शश्वद्याचकचातकेषु विदितः पूर्णाम्बुवर्षी घनः ।
दारिद्र्यादिदुरन्तदुःखशमने व्यक्तं विभुः प्रोच्यते
रे रे मूढजना भजध्वमनिशं दुर्वाससं तं मुनिम् ॥१०॥

धन्योऽसौ द्विजनायकोऽत्र भुवने यस्यात्मजोऽभून्मुनिः
संन्यासाभिरतो नितान्तविदितब्रह्मस्वरूपः प्रभुः ।
दुर्वासाः करुणाकरो वसति वै वैकुण्ठलोके सदा
पुत्रस्योग्रतपःस्थितस्य नियमात्साकं स्वपत्न्यानिशम् ॥११॥

दुर्वाससः सन्ति गुणा ह्यनन्ता–
स्तान्कः समर्थोऽस्ति भुवि प्रशस्तान् ।
वक्तुं ततो मे मतिमानतोऽस्मिन्
ग्रन्थे समुक्ताः सततं हि सन्ति ॥१२॥

यद्दूषणं मेऽजनि पण्डितास्त–
दस्मिन्क्षमध्वं प्रणयात्कवीन्द्राः ।
मूढेन बद्धोऽञ्जलिरेष ग्रन्थे
युष्मभ्यमत्यल्पधिया मया हि ॥१३॥

स्वप्ने शिवेनैव गुणाः प्रदिष्टा
दुर्वाससो मह्यमनुक्रमेण ।
ख्याता मया ते त्वत एव देयं
नो दूषणं मे कवयः प्रगल्भाः ॥१४॥

यदक्षरं वृद्धिगतं समूनं
यच्चापि जातं मम बुद्धिमोहात् ।
काव्ये मुनीशैरभिवन्दितस्य
दुर्वाससोऽस्मिन् त(स्मिंस्त)दलं क्षमध्वम् ॥१५॥

स्वरोऽधिकः क्वापि च चेद् भवेद्वै
छन्दः क्वचित् (33 b) स्यात्स्खलितं कवीशाः ।
तत्क्षामये दूषणजातमत्र
गच्छन्स्खलेद्वै पुरुषस्ततो वः ॥१६॥

भो भो सभ्याः शृणुत वचनं मत्सरो नैव कार्यः
श्रीमद्दुर्वाससो मे कृतमिह रमणं काव्यमत्यद्भुतं च ।
अस्मिन् हार्दं क्वचिदपि रचितं तत्सदा चिन्तनीयं
दोषस्त्याज्योऽनिशममरतामिच्छुभिर्वो गुणाढ्याः ॥१७॥

सन्तः स्वयं परहितेषु रता भवन्ति
पूज्यास्त एव भुवनेऽपि भवन्ति नित्यम् ।
तत्संगतस्त्रिभुवनेऽस्ति शुभं च नित्यं
तेभ्यो नमोऽस्तु सततं मम मन्दबुद्धेः ॥१८॥

सद्वस्तुनिष्ठाः प्रभवन्ति सन्तो
हंसा यथा क्षीरभुजस्त्रिलोके ।
असत्पुमांसोऽपि भवन्ति मुक्ता–
श्चापायसंविद्भुगसन्सुनिष्ठाः ॥१९॥

× × भारतीश्रीनृसिंहस्य शिष्यं
नमामीह भक्त्या मुनिं तापसेशम् ।
तपोयोगनिष्ठं स्वशिष्यैः परीतं
सदानन्दसंदोहसंयुक्तचित्तम् ॥२०॥

यद्वक्त्रस्य निरीक्षणात्त्रिभुवने पुंसां पलायेत्क्षणा–
द्दारिद्र्यं परिपूर्णचन्द्रसुरुचस्ताम्बूलपूर्णस्य च ।
शश्वच्चन्दनचर्चितस्य सुदतस्तं तापसेशं मुदा
भक्त्या नौमि मुनीश्वरार्चितपदं दुर्वाससं नित्यदा ॥२१॥

रसिकरमणसंज्ञं काव्यमेतच्चकार
कविवररघुनाथो ह्यत्र दुर्वाससोऽहम् ।
शुभगुणसमुदायज्ञापकं तेन कृत्वा
मम भवतु सुतुष्टोऽसौ मुनिः पूर्णलक्ष्मीः ॥२२॥

इति श्रीमहामतिसुतस्य दुर्वासस: काव्ये रसिकरमणसंज्ञे कवि श्रीरघुनाथविरचि (34 a) ते दुर्वाससो गुणवर्णनो नाम अष्टादश: सर्ग: ।।

× × ×

यावद्दिनेशस्तपतीह लोके
यावच्च वेदोक्तसमस्तधर्मा: ।
यावद्धरा तिष्ठति काव्यमेतद्
दुर्वाससस्तावदिदं विजीयात् ।।१।।

× × ×

संवत् १६२१ वर्षे अश्विनमासे शुक्लपक्षनवम्यां तिथौ गुरुदिने लिखितमिदं काव्यं रसिकरमणसंज्ञं व्यासश्रीजयरामतनूजेन रघुनाथेन भारतीश्रीदुर्वासासंतोषणार्थम् ।

× × ×

शिवमस्तु सर्वजगत: परहितनिरता भवन्तु भूतग्गणा: ।
दोषा: प्रयान्तु नाशं सर्वत्र सुखी भवतु जन: ।।१।।
नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नम: ।।२।।
यं ब्रह्मा वरुणेन्द्ररुद्रमरुत: स्तुन्वन्ति दिव्यै: स्तवै–
र्वेदै: साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगा: ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदु: सुरासुरगणा देवाय तस्मै नम: ।।३।।

× × ×

दुर्वासाश्री जयति ।। श्रीरस्तु ।।
(34 b) ।। स्वयं दुर्वासानि काव्यं रसिकरमण ।।
रक्ताक्षसंवत्सर